In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला – (ii) 21

उमरखय्यामस्य रुबायत्

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

संस्कृतानुवादः
हरिकथापितामहः, कलाप्रपूर्णः
श्रीमदज्जाडादिभट्टलनारायणदासः

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकः परियोजना – अनुसन्धाता च
श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023

In Public domain. Digitization Muthulakshmi Research Academy

In Public Domain. Digitization Muthulakshmi Research Academy
संस्कृत अकाडमी षष्यब्दग्रन्थमाला – (ii) 21

उमरखय्यामस्य रुबायत्

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः
दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

संस्कृतानुवादः
हरिकथापितामहः श्रीमदज्जाडादिभट्लनारायणदासः

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादिका
डा के वरलक्ष्मीः
उपनिदेशिका

सहसम्पादकः परियोजना – अनुसन्धाता च
श्रीमान् के वि सूर्यप्रकाशः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् – 07
2023

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Lakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamālā (ii) 21

Rubāyat

(Re-printing of rare book project)
This publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone & Fax:
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Rubāyat

ISBN – 978-93-80171-84-5

© Sanskrit Academy

Year : 2023
Pages : 85
Copies : 300
Price



In Public domain. Digitization Muthulakshmi Research Academy
Sanskrit Academy Shashtyabda Granthamālā (ii) 21

Rubāyat

of

Umar Khayyam

(Published under "Re-printing of rare books project", Ashtadashi scheme of Central Sanskrit University, New Delhi)

Sanskrit Translation

Harikathāpitāmahaḥ

Śrīmadajjāḍādibhaṭlanārāyaṇadāsaḥ

Chief-Editor

Prof. K. Neelakantham

Director

Editor

Dr. K Varalakshmi

Dy. Director

Associate Editor & Project Investigator

K.V.Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University, Hyderabad – 500 007

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamālā (ii) 21

Rubāyat

(Re-printing of rare book project)
This publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Rubāyat

ISBN – 978-93-80171-84-5

© Sanskrit Academy

Year : 2023
Pages : 85
Copies : 300
Price



In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

ओम् श्री गुरुभ्यो नमः

।। श्री शङ्करभगवत्पादा विजयन्ते ।।

काव्यवाङ्मये भाषासु सर्वास्वपि प्रायः अनुकरणपध्दतिः दृश्यते। राजशेखरः काव्यमीमांसायां द्वादशाध्याये कविप्रभेदेषु अनुकरणरीतिमप्यबोधयत्। तत्र सः प्रतिबिम्बाकार, आलेख्याकार, देहान्तरतुल्य संवादरूपेण अनुकरण/अनुवाद काव्यानि च दृश्यन्ते इति तेषां लक्षणानि, उदाहरणानि च कानिचनादर्शयत्। एवञ्च आनन्दवर्धनः ध्वन्यालोके, हेमचन्द्रः काव्यानुशासने अन्ये च लाक्षणिकाः केचन अनुकरण कवितामुद्दिश्य सङ्क्षेपेण अगादिषुः। आधुनिकः लाक्षणिकः रेवाप्रसाद द्विवेदी स्वकाव्यालङ्कार-कारिकायाम् अनुकरण-अनुवादकवीनां लक्षणानि प्रास्तौत्।

भगवान् पाणिनिः अनुकरणं चानिति परम् (1-4-62), अनुवादे चरणानाम् (2-4-3) इत्यादि सूत्रेषु अनुकरण-अनुवादशब्दावुदाजहार। तत्र "खाङ्कृत्य" इत्युदाहरणेन पाणिनिः अनुकरणशब्दः ध्वन्यनुकरणार्थमेवोपायुनगिव दृश्यते। किन्तु "अनुकरणम् = सदृशीकरणम्, व्याकरणमते तद्विविधम्, यत्र अर्थरहितस्य केवलशब्दस्य सदृशकरणं तत् शब्दानुकरणम्, यत्र अर्थविशिष्टस्य सदृशकरणम् तदर्थानुकरणम्" इति शब्दकल्पद्रुमो विवृणोति। "अनुकरणम् = सदृशक्रियादिकरणम्, तच्च गुणक्रियावयवादिभिः सदृशीकरणम्, अनुक्रियते अनेनेत्यर्थे करणे ल्युट् प्रत्ययः" इति वाचस्पत्यं भणति। अनेन प्रायः इत्थं वक्तुं

In Public domain. Digitization Muthulakshmi Research Academy

शक्यते यत् पूर्वान् कवितल्लजान् अनुकृत्य अनुसृत्य वा तैरेव शब्दैः भाषान्तरेण कवयितुं कृतयत्नः, अथवा पूर्वैर्वर्णितान् अंशान् यथातथं स्वीकृत्य ततोऽपि किञ्चिद्विशेषेण तद्भावम् अन्यया भाषया प्रकटीकर्तुं कृतो यत्न एव "अनुकरणम्" इति।

अनुवादस्तु शब्दानुवादः अर्थानुवादः भावानुवादः इति त्रिविध इति कथयन्ति पण्डिताः। अनुवादे चरणानाम् (2-4-3) इति पाणिनेः सूत्रस्य काशिकाकारौ "प्रमाणान्तराव- गतस्यार्थस्य शब्देन सङ्कीर्तनम् अनुवादः" इति व्याचख्यतुः। सिध्दान्तकौमुद्यां बालमनोरमाकारोऽपि "अवगतार्थस्य प्रतिपादने" इत्येवावोचत्। आङ्ग्लव्याख्याकारः यस् सि वसु पण्डित एवमवादीत् - "The word 'anuvAda' means repetition by way of explanation, illustration or corroboration; that is to say, when a speaker demonstrates for some special purposes, a preposition which had already been demonstrated before, that is called '*AnuvAda*'. Another meaning of the word is 'the recitation of the *charanas* as already learnt as distinguished from learning them the first time" इति। पूर्वकविभिः प्रोक्तम् अनुसृत्य तादृशैरेव पदैः तत्समानमेव भावं प्रकटीकर्तुं कृतो यत्न एव अनुवाद इति विबुधानामभिप्राय इत्यवगम्यते।

प्राचीनकालादारभ्य नैके महाकवयः भारत-भागवत-रामायणादीन्, काव्य-नाटकादीनि च विविधासु भाषास्वनूदित वन्तः। ते मूलमनुसृत्य यथातथम् अनुवादं न चक्रुरिति कृत्वा

स्वेच्छानुवाद एवेति कथयन्ति विद्वांसः। किन्तु **नामूलं लिख्यते किञ्चित्** इति मल्लिनाथोक्तिमनुसृत्य केचन श्रीपाद कृष्णमूर्तिसदृशाः विद्वत्कवयः श्रीमद्रामायणम्, महाभारतम्, भागवतपुराणं च तेलुगुभाषायाम् यथामूलम् अनूदितवन्तः। एवमेव अन्यासु भारतीयभाषास्वपि अनेके कवयः यथातथं इतिहासग्रन्थान् अनुवादमकार्षुः। एवम् अनुवादसाहित्यस्य चरित्रम् अवलोकयाम श्चेत् प्राचीनांग्लमहाकवीनां नैकान् ग्रन्थान् अस्माकं भारतीयाः तत्रापि अस्माकं तेलुगुप्रान्तीयाः वाविलाल वासुदेव शास्त्री, विश्वनाथ शास्त्री, कनकसुन्दरं महोदयः, काळ्ळकूरि हनुमन्तरावः, भानुमूर्तिः इत्यादयः अनूदितवन्तः। अपि च पद्मश्रिया विभूषिताः लोकप्रसिध्दाः महामहोपाध्याय आचार्य पुल्लेल श्रीरामचन्द्रुडुवर्याः पारसीभाषागतान् लोकोक्तीन् सङ्गृह्य **पारसीकसोकोक्तयः** इति नाम्ना अनूद्य प्रकाशितवन्तः। आदिलाबाद जनपदस्थाः साहित्य अकाडम्या पुरस्कृताः बहुभाषाकोविदाः सामल सदाशिव महाशयाः पर्षियन्, अरबिक्, उर्दू, मराठीत्यादि भाषागतानि नैकानि कविता पुस्तकानि अनूद्य पण्डितानां प्रशंसामगात्। एतेषु सर्वेषु विद्वत्कविष्वन्यतमोऽस्ति हरिकथापितामहः कलाप्रपूर्णः श्रीमान् अज्जाडादिभट्ल नारायणदास पण्डितः।

अयं महानुभावः **गोल्ड स्मित्** इत्याख्यस्य आंग्लकवेः **ट्रावेलर्** नवलां **बाटसारि** इति नाम्ना अनूदितवान्। अपि च उमर् खय्याम् इति पारसीककवेः पाश्चात्यसाहित्यलोके अतिविश्रुतं **रुबायत् कवितासङ्घं** संस्कृतभाषया तेलुगुभाषया आंग्लभाषया च

In Public domain. Digitization Muthulakshmi Research Academy

अनूदितवान्। उमर् कवेः कवितासङ्ग्रहमिदं तावत् बह्वीषु पाश्चात्यभाषासु भारतीयभाषासु चानूदितवन्तः कविपण्डिताः। प्रसिध्देन आंग्लकविना **एड्वर्ड् फिज्गराल्ड्** इत्याख्येन रुबायत् सङ्ग्रहम् आंग्लीकृतम्। किन्तु तेनानुवादेन न प्रीतोऽयं सुधीमणिः श्रीमान् नारायणदासः पर्शियन् भाषामभ्यस्य ग्रन्थान् परिशील्य रुबायीकविताः तेलुगुभाषया संस्कृतभाषया च 1932 तमे वर्षे अनूदितवान्। तत्पूर्वमेव 1922 तमे वर्षे महाकवेः कालिदासस्य, पाश्चात्यकवेः **षेक्स्पियरस्य** च रचनाभ्यः रससम्बन्धिसन्निवेशान् सङ्गृह्य "नवरसतरङ्गिणी"ति नाम्ना तेलुगुभाषया खण्डकाव्यम् अरचयत्। ततः भारतीयतात्त्विकसिध्दान्तान् तेलुगुभाषया विशदीकर्तुं "जगज्ज्योतिः" नाम प्रसिध्दं ग्रन्थं रचयामास। एवमेव ऋग्वेदात् प्रायः त्रिशतं ऋचः सङ्कलय्य तेलुगुभाषया अनूद्य कर्नाटकसङ्गीतमाध्यमेन स्वयं गात्वा वीणावादनेन संयोजयितुं शिष्येभ्यः अशिक्षयत्। नैकशास्त्रवित् श्रीमान् नारायणदास् पण्डितः आंग्लेनाप्यनूद्य पाश्चात्यविद्वद्भिरपि प्रशंसित इत्यहो भाग्यम् अस्माकं तेलुगुजनानाम्।

महाकविः, बहुभाषानिष्णातः, सङ्गीतसाहित्यसार्वभौमः, अष्टावधानी, हरिकथापितामहः, समाजसेवकः श्रीमदज्जाड आदिभट्ल नारायणदास पण्डितः 1864 तमे वर्षे आगस्ट् मासस्य 31 तमे दिनाङ्के स्वजनिं लेभे। पुण्यदम्पत्योः श्री लक्ष्मीनरसमाम्बा-वेङ्कटचयनयोः सन्ताने अयं कनिष्ठः। अस्मात् ज्येष्ठाः चत्वारः भ्रातरः, चतस्रः स्वसारश्चासन्। आन्ध्रप्रदेशे "बोब्बिलि" राज्यस्य

In Public domain. Digitization Muthulakshmi Research Academy

समीपे पवित्रस्वर्णमुखीनदीतीरे स्थितस्य "अज्जाड" इत्याख्यग्रामवासिनः एते। बाल्ये महाकवेरस्य नाम सूर्यनारायण इत्यासीत्, किन्तु तदनन्तरकाले हरिकथाकथने पटुरयं नारायणदास नाम्ना ख्यातिमलभत। बाल्ये अस्य तेलुगु-संस्कृतपद्यानां गानशैलीं दृष्ट्वा प्रीतोऽस्य मातामहः साधारणविद्यया सह सङ्गीतविद्यामपि अशिक्षयत्।

तेलुगु, संस्कृतम्, तमिलम्, हिन्दी, ओरिया, बङ्ग्ला, उर्दू, अरबिक्, पर्शियन् आङ्ग्लम् इत्यादि भाषाः अधीत्य नैकेषां ग्रन्थानाम् अनुवादं चकारायं श्रीहरिदासः। तेलुगुभाषायां कविपण्डितानां कृते प्रसिध्दा प्रक्रिया वर्तते अष्टावधानम्। अत्र तेलुगुसाहित्ये असामान्यपण्डितोऽयं नारायणदासः बहूनि अष्टावधानानि कृत्वा आन्ध्रदेशे विदुषां, कविमूर्धन्यानाञ्च प्रशंसापात्रो बभूव। हरिकथामृतम्, रामचन्द्रशतकम्, काशीशतकम्, तारकम् इति चत्वारि काव्यानि संस्कृते अरचयदयं पण्डिताग्रणीः। एतानि संस्कृत परिषद् पक्षतः मुद्रापितान्यपि।

इदानीम् अस्माकं सौभाग्यवशेन श्रीमद्भिः आदिभट्ल कविभिः संस्कृते अनूदितं उमर् खय्यां पण्डितस्य रुबायत् कवितासङ्ग्रहं मुद्रापयितुं सन्नध्दाः भवामः। पूर्वं 1932 तमे वर्षे ततश्च 2009 तमे वर्षे नवदेहलीस्थ साहित्य अकाडमी संस्थया चतसृभिः भाषाभिस्सह मुद्रापितमिदम्। किन्त्वत्र वयं केवलं संस्कृतानुवादमेव स्वीकृत्य संस्कृतज्ञानां परिशोधनपटूनाम् सम्मुखम् आनेतुं प्रयतामहे।

In Public domain. Digitization Muthulakshmi Research Academy

अस्यानुवादकाव्यस्यारम्भे **उमर् कविप्रशंसा** इत्याख्येन सुमधुरया संस्कृतभाषया विस्तृता प्रस्तावना उपस्थापिता आचार्यैः आदिभट्लमहाशयैः। अतो वयमत्र उमर् महाशयस्य प्राशस्त्यं न प्रस्तुतीकुर्मः।

अधीतचतुर्दशविद्यस्य षोडश कलानिपुणस्य महाकवेः श्रीमतः आदिभट्ल नारायणदास पण्डितस्य प्रतिभायाः परिपाकेन, भावसौष्ठवेन, भाषामाधुर्येण, सरसाभिव्यक्त्या, सालङ्कृतपदावल्या, रसपरिपाकेन च सहृदयहृदयान् आह्लादयति **रुबायत्** काव्यमिदम्। साधारणतया अनुवादग्रन्थेषु अत्यन्तसरलानि क्रियापदान्येव उपयुञ्जन्ति कवयः। किन्तु शास्त्रकवेरस्य लुङ् प्रयोगाः तत्रापि सन्नन्तप्रयोगाः साहित्यप्रियान् आश्चर्यचकितान् कुर्वन्त्यस्मिन् काव्ये। अपि च

"मिथ्यैव स्वर्गनरकौ सत्यमायुर्विनश्यति।
सूक्ष्मसूक्ष्मतमो धर्मः केनापि न हि बुध्यते।
अविद्यया आत्मा बध्दश्चेत् विद्यया मुच्यते पुनः,

ब्रह्म सत्यं जगन्मिथ्या" इत्याद्यनेकैः वाक्यैः बहुत्र वेदान्ततत्त्वं स्मारयन्तः कवीश्वरा एते **विनश्वरे जगति एकं सत् अविनश्वरं च वस्तु ब्रह्मैव तदेव जीवने अन्वेषितव्यम्** इत्यादि निगूढतत्त्वान् बोधयन्ति **रुबायत्** गीतेषु श्री नारायणदास महाशयाः। एकत्र प्रेमतत्त्वम्, एकत्र च पानपात्रम्, अन्यत्र च वेदान्ततत्त्वम् एवं सर्वान् अंशान् सम्मिल्य वर्णयितुं केवलं महापुरुषाः तपस्सम्पन्नाः हरिकथापितामहसदृशा एव शक्नुवन्ति

In Public domain. Digitization Muthulakshmi Research Academy

इत्यत्र न सन्देहः। संस्कृतसंशोधनरताः अनुसन्धातारः एतादृशान् अनुवादग्रन्थान् परिशीलनार्थम् अवलोकयन्ति चेत् उत्तमं भवति।

अस्माकं सौभाग्यवशात् श्रीमतः नारायणदासस्य प्रदौहित्री श्रीमती उपाध्यायुल राजराजेश्वरी, उपाध्यायुल नारायणदासवर्यः अनुवादकाव्यमिदं अकाडमी पक्षतः केवलं संस्कृतानुवादभागमेव पुनर्मुद्रापयितुमङ्गीकृतवन्तौ। अस्माकम् उपनिदेशिका संशोधने, अध्ययनाध्यापनयोश्च कुशला डा. वरलक्ष्मीः लघुकाव्यमिदं सम्यगधीत्य परिशील्य प्रकाशनाय सिध्दं कृतवती। तस्याः श्रध्दां कार्यसाधनपटुताम् अभिनन्दामि। अपि च श्रीमद्भ्याम् उपाध्यायुल राजराजेश्वरी-नारायणदास दम्पतीभ्यां प्रणतिपुरस्सरं कार्तज्ञं विनिवेदयामि।

अस्माकं संस्कृत अकाडम्याः उपनिदेशकः निरन्तराध्ययन रतः विद्वान् डा वि सुब्रह्मण्यः, शोधसहायकः अनुसन्धानरतः डा जोशी सन्तोषकुमारः अपि च अस्याः परियोजनायाः समवेक्षकः अकादम्यां ज्येष्ठशोधसहायकः श्री के वि सूर्यप्रकाशः । एवं च युवसंशोधकः चिरजीवी जोशी भरद्वाजः, सर्वेषामेतेषां कार्यदीक्षां चाभिनन्दामि।

अष्टादशीयोजनायां प्राचीनविशिष्टग्रन्थानां पुनर्मुद्रणावकाशं संस्कृत परिषदे कल्पयित्वा अस्मान् सततं प्रोत्साहयन्ति नवदेहलीस्थ केन्द्रीय संस्कृत विश्वविद्यालयस्य (राष्ट्रीय संस्कृत संस्थानस्य) उपकुलपतिवर्याः आचार्याः श्रीनिवास वर्खेडि महोदयाः, कुलसचिवाः आचार्याः रञ्जित् कुमार बर्म महाशयाः,

In Public domain. Digitization Muthulakshmi Research Academy

तेभ्यः सश्रध्दं प्रणामाञ्जलिं निवेदयामि। अपि च उस्मानिया विश्वविद्यालयस्य उपकुलपतिवर्याः आचार्याः डि रवीन्दर् महाशयाः, कुलसचिवाः आचार्याः पि. लक्ष्मीनारायण महाशयाः परिशोधने पुस्तकप्रकाशने च सततम् अस्मान् प्रचोदयन्ति। एवमेव केन्द्रीय संस्कृतविश्वविद्यालये आदर्शसंस्थानां निदेशकः आचार्यः गायत्री मुरलीकृष्णः सस्नेहं सर्वथा अस्मान् प्रेरयति। एतेभ्यः सुहृद्भ्यः सर्वेभ्यः धन्यवादान् वितरामि।

पुस्तकस्यास्य उद्दङ्कणे अस्मभ्यं सहकृतवत्यै श्रीमत्यै जि श्रीदेवी महाशायायै, समुचितरीत्या समये मुद्रणं कृत्वा दत्तवद्भ्यः Karshak Art Printers महाशयेभ्यः संस्कृत अकाडमी पक्षतः धन्यवादान् प्रकटयामि।

बुधजनविधेयः

आचार्यः के. नीलकण्ठः

निदेशकः संस्कृत अकाडमी, हैदराबाद

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्कथनम्

सुरभारती सर्वासां भारतीयभाषाणां जननीति निश्चप्रचं वक्तुं शक्यते यतः संस्कृतवाङ्मयमेव सकलभारतीयभाषावाङ्मयस्य स्रोतः। सुरभारत्या आविर्भूतं विकसितं प्रवृद्धञ्च भारतीयभाषाणां साहित्यं सुरभारतीमपि अनुवादवाङ्मयरूपेण परिपुष्णातीति उक्तौ नास्ति संशीतिलेशः।

प्रतिभाशालिनः विपश्चित्प्रवराः न केवलं भारतीयभाषा साहित्यम् अपितु विदेशीयभाषावाङ्मयमपि अनूद्य सुरभारतीं समसेवन्त संसेवन्ते च।

नारायणदासस्य जीवनविशेषाः

तादृशप्रतिभाशालिषु सुरभारतीसमुपासकेषु मूर्धन्यस्थानम् अलङ्करोति श्रीमदज्जाडादिभट्ट नारायणदासः यः हरिकथापितामहः इति विश्वे विश्रुतः।आन्ध्रदेशस्य श्रीकाकुलमण्डले विद्यमाने अज्जाडनामके ग्रामे आदिभट्लाभिधे पवित्रे द्राविडब्राह्मणवंशे वेदवेदाङ्गाध्ययनसम्पन्नस्य षट्कर्मनिरतस्य सनातनधर्मपरस्य पुराणप्रवाचकस्य वेङ्कटचयनुलु नाम्नः पण्डिततल्लजस्य नरसमाम्बायाश्च पुत्रः सूर्यनारायण एव कालान्तरे नारायणदास इति विख्यातिं गतः।

जन्मवृत्तम्

"रक्ताक्षिसंवत्सरे श्रावणकृष्णचतुर्दशीसौम्यवासरे पूर्वरात्रौ दशघटिकोपरि मघानक्षत्रे चतुर्थचरणे पार्वतीपुरे प्राग्दिश्येकयोजन

In Public domain. Digitization Muthulakshmi Research Academy

दूरे सुवर्णमुखीनदीतीरस्थिताज्जाड ग्रामेऽहमुद्बभूव (31.8.1864) किल".....इति स्वयं नारायणदासः श्रीहरि कथामृतमिति प्रबन्धे स्पष्टयकरोत्। अयं बाल्यावस्थायामेव पितृमुखात् सकृत् श्रुतान् श्लोकान् एकश्रुतग्राहित्वात् पुनः श्रावयति स्म। चतुर्दशवर्षीयोऽयम् उन्नतविद्याभ्यासार्थं विजयनगरं जगाम। सङ्गीतनृत्याभिनयादि कलाः संस्कारवशात् स्ववशङ्गता बभूवुः।

बिरुदानि

सङ्गीतकलाशालाध्यक्षः – क्रि.श. 1919 तमे वर्षे विजयनगराधिपतिः विजयरामगजपतिः सङ्गीतकलाशालां संस्थाप्य नारायणदासं तत्प्रांशुपालं चकार। क्रि.श. 1936 तमे वर्षे कलाशालायाः अध्यक्षपदवीतः निवृत्तः। हरिकथासम्प्रदायस्य प्रचारप्रसारे कटिबद्धोऽयं बुधाग्रणीः नैकान् शिष्यान् हरिकथाविद्यया अनुगृहीतवान्। नारायणदासस्य सुदीर्घशिष्यपरम्परा अद्यावधि विराजते आन्ध्रदेशे तेलङ्गाणादेशे च। **आन्ध्रदेशभूषणम्, लयब्रह्मा, सङ्गीतसार्वभौमः, आटपाटलमेटि, श्रृङ्गारसर्वज्ञः** इत्यादिभिः बिरुदैः नारायणदासः सत्कृतः। क्रि.श. 1939 तमे वर्षे चेळ्ळपिळ्ळ वेङ्कटशास्त्रिकरकमलाभ्यां आन्ध्रविश्वविद्यालयपक्षतः **कलाप्रपूर्ण** इति बिरुदेन पुरस्कृतः। विजयनगरमहाराजैः मैसूरुमहाराजेन च नैकत्र नैकैः विद्वद्भिश्चायं सम्मानितः।

हरिकथापितामहः – क्रि.श. 1914 तमे वर्षे बन्दरुनगरे प्रवृत्तेन नारायणदासस्य हरिकथाप्रदर्शनेन चेल्लपिल्लि वेङ्कटशास्त्री सन्तुष्टान्तरङ्गस्सन् **"हरिकथापितामह"** इति बिरुदं तस्मै प्रादात्।

In Public domain. Digitization Muthulakshmi Research Academy

नारायणदासरचनाः – नारायणदासः षड्त्वारिंशतः सङ्ख्याकान् ग्रन्थान् रचयामास। अनुवादग्रन्थाः हरिकथागानप्रबन्धाः स्वतन्त्रकल्पनाग्रन्थाः वेदान्तग्रन्थाश्चेति नारायणदासस्य रचनाः चतुर्धा भवन्ति। नारायणदासः अधिकतया तेलुगुभाषया रचनाः लिलेख। गीर्वाणभाषया अल्पसङ्ख्याकाः रचनाः एव स चकार। परं प्रभूतं संस्कृतसाहित्यम् आन्ध्रभाषया अनूदितवान्। अपिच संस्कृतसाहित्याधारेण आन्ध्रभाषया स्वतन्त्रकल्पनारचनाः वेदान्तग्रन्थरचनाश्च चकार।

संस्कृतवाङ्मयम् – 1. काशीशतकम् 2. चातुर्वर्ग्यसाधनम् (अलभ्यम्) 3. तारकम् 4. दशविधरागनवतिकुसुममञ्जरी 5. मृत्युञ्जयाष्टकम् 6. रामचन्द्रशतकम् 7. श्रीहरिकथामृतम् 8. प्राचीनपारसीकभाषया विरचितस्य **रुबायत्** आख्यस्य काव्यस्य संस्कृतानुवादः ।

हरिकथावाङ्मयम् - पुराणेतिहाससाहित्याधारेण चतुर्दश हरिकथाः अनेन विरचिताः।

1. अम्बरीषचरित्रम्
2. गजेन्द्रमोक्षणम्
3. गोवर्धनोद्धारः
4. गौरप्पपेण्डु
5. जानकीशपथः
6. ध्रुवचरित्रम्
7. प्रह्लादचरित्रम्
8. भीष्मचरित्रम्
9. मार्कण्डेयचरित्रम्
10. यदार्थरामायणम्
11. रुक्मिणीकल्याणम्
12. सावित्रीचरित्रम्
13. हरिश्चन्द्रोपाख्यानम्
14. श्रीहरिकथामृतम्।

In Public domain. Digitization Muthulakshmi Research Academy

उमरुकविविरचितरुबायितः पारसीकदेशीयोमरुकवेः प्राचीनपारसीकभाषया विरचितस्य रुबायत् आख्यस्य काव्यस्य संस्कृतानुवादः नारायणदासेन अतीव कौशलेन विहितः।

1048-1131 क्रिस्ताब्दयोः उमरुकविजीवनकाल इति वदन्ति विमर्शकाः। इरानभूखण्डस्थ-खोरास्सने विद्यामानं नैशापुरम् उमरुकवेः जन्मस्थानमस्ति। प्रतिभासम्पन्नोऽयं कविः ज्योतिष्कः गणितशास्त्रज्ञश्च। स्वदेशे खगोलज्ञरूपेण उमरुकविः प्रख्यातिं गतः। कविरूपेण विदेशेषु एव यशः लेभे उमरुकविः। Edward Fitzerald इति कश्चन आङ्ग्लकविः उमरुकवेः रुबायिताख्यकाव्यम् 'Rubaiyat of Omar Khayyam' इति आङ्ग्लभाषया अनूदितवान्। स च आङ्ग्लानुवादः असाधुरस्तीति अभिप्रैति नारायणदासः। बहुभाषाकोविदः नारायणदासः उमरुकविरचनां रुबायिताख्यकवितां संस्कृतेन अनूद्य संस्कृतपण्डितानां प्रशंसापात्रतां गतः। पारसीककविसमयः संस्कृतवाङ्मयसम्प्रदायाद्भिन्न एव। तथापि पारसीकसाहित्य समुपासनेन पारसीककविसमयपरिज्ञानम् अधिगत्य कविः नारायणदासः छन्दोमयम् संस्कृतानुवादं चकार। न केवलं संस्कृतेन अपितु प्राचीनतेलुगुभाषयाऽपि नारायणदासकविः अनूवादं चकार।

विधातृलिखितं कोऽपि परिमार्ष्टुं न शक्यते।
येनकेनाप्युपायेन भक्त्या वा तपसाथवा।।

दैवमलेखीदादौ ललाटफलकेषु भावि कर्मफलम्।
गुणदोष समालेखि न्यस्य वरीवृत्यतेप्यऽविश्रान्ता।

In Public domain. Digitization Muthulakshmi Research Academy

प्रथमदिन एव सृष्टेर्निरणेनीयिष्ट भाव्यवश्यफलम्।
अस्मात्पौरुषमखिलं चिन्तास्माकं वृथै व बोभूतः।।

काव्यादुद्धृता इमे श्लोकाः कविप्रतिभायाः निकषोपलायन्ते। शब्दविनिमयमात्रपर्यवसायित्वाभावात् अर्थपोषकतया मूलकाव्य विचाराप्रहाणपूर्वक-चमत्कृतिविशेषोत्पादकतया अनूदितमिदं काव्यं सहृदयहृदयावर्जकमस्तीति निश्चप्रचम्।

मूलं काव्यं पुष्पं परिमलसदृशा भवन्त्यनुवादाश्च।
साहित्यस्योद्याने रसिकभ्रमराः सदा तृप्ताः।
महिमानं ते प्रापुस्त्वनुवादैः किल च कालिदासाद्यः
विश्वव्याप्तां कीर्तिं राष्ट्रे पुनरपि च गौरवम्।।

इति विदुषां राधावल्लभत्रिपाठिनां वचनमनुसृत्य प्राचीन पारसीकभाषया उमरुकविना विरचितस्य रुबायिताख्यस्य काव्यस्य अनुवादं विधाय नारायणदासकविः यशःकायेन अमरस्सञ्जात इत्युक्तौ नास्त्यतिशयोक्तिः।

डॉ. के. वरलक्ष्मीः
उपनिदेशिका

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

RUBÂIYÂT OF OMAR KHAIYÂM

BY

UPADHYAYULA NARAYANA DAS

"IT IS NOT MY HABIT TO HAVE MY WORKS CORRECTED AND RECAST BY OTHERS!"

— Ādibhaṭla Nārāyaṇa Dās

The reason that attracted Nārāyaṇa Dās to Omar Khaiyâm could perhaps be a shared worldview towards life and religion. Both of them were Sun-worshippers and polymaths. In his English introduction to the *Rubâiyât of Omar Khaiyâm*, Nārāyaṇa Dās says "Omar Khaiyâm commences his verses with the word "Khurshīd", which means the Sun; because I presume, he was a sun worshipper..."

Omar Khaiyâm's interests extended from poetry, music, philosophy and theology to mathematics, astronomy, geography, mineralogy and meteorology. Nārāyaṇa Dās' interests extended from poetry, music and musicology, literature and linguistics, dance and acting, philosophy, theology and Vēdik studies (a conglomeration of various branches of theology, philosophy, arts and sciences) to astrology and medicine (Āyurvēda).

Neither of them was properly understood by his contemporaries during his life time. Omar Khaiyâm

In Public domain. Digitization Muthulakshmi Research Academy

was seen either as an atheist and hedonist or at the other extreme, as a mystical Sufi poet. In the case of Nārāyaṇa Dās although his proclivity to the Bhakti tradition was never in doubt, his philosophy of humanism might not have been fully understood. While Nārāyaṇa Dās devoted his life to the teaching of 'Bhakti, Jñāna, Mōkṣa', he condemned with vehemence some prevailing practices of his time, such as animal sacrifice as unacceptable, as he felt they were at variance with the spirit of Vēdik philosophy.

Nārāyaṇa Dās used to absorb knowledge from his environs just as a sponge absorbed water, and improve upon it. After coming into contact with the Hindustāni musician, Mohabbat Khān at Vijayanagaraṃ, he cultivated the Hindustāni genre of music to develop a Karṇātik-Hindustāni hybrid timbre. Similarly, when he was thirty-seven, he came into contact with a Maulvi, he utilized the opportunity to pick up rudiments of Arabic and Persian from him, obtained books on their teaching and began developing his knowledge of the two languages. His interest in Persian grew when he observed that 'Old Persian'[i] has some resemblance to Prākṛtaṃ, considered to be the colloquial form of literary Saṃskṛtaṃ. This could well be the case because 'Old Avestan', the precursor of

In Public domain. Digitization Muthulakshmi Research Academy

the Iranian languages, was closer to what linguists call Indic Saṃskṛtaṃ, whereas 'Young Avestan' was closer to Persian. In fact, both 'Old Persian' and 'Middle Persian' were written left to right like Prākṛtaṃ unlike their modern-day version, which adapted the Perso-Arabic script, written right to left. In his Saṃskṛtaṃ introduction to *Rubâiyât of Omar Khaiyâm* Nārāyaṇa Dās observed that although there were Yavana[ii] terms, much of the Rubâiyât, Omar Khaiyâm wrote was in 'Old Persian', which in his view was closer to Prākṛtaṃ.

Over time, Nārāyaṇa Dās developed a great admiration for the Persian philosopher-poet. When he read Edward Fitzgerald's English translation of the Persian quatrains, he felt they were not true to the original. It is now known that not only Fitzgerald's translations were not literal but he also mingled the quatrains. Fitzgerald's translation has about three hundred verses. Of these Nārāyaṇa Dās selected a hundred and ten and their original Persian quatrains and translated the original and their English translation into Saṃskṛtaṃ and Acca-Telugu.

Translating from one language to another could be a daunting task because it is not just conveying the meaning of words. A language evolved over time embeds the culture and traditions; beliefs and values;

In Public domain. Digitization Muthulakshmi Research Academy

rituals and practices and history and legends of a society in its usages and idioms. If the translator is not proficient in either of the languages, he might miss the meaning altogether or the translation might appear to be artificial like a patchwork quilt. Good translation requires not only proficiency in both the languages but great technical skill to express the idiom of one language in the corresponding idiom of the other. As languages continue to evolve, meanings of words and usages change over time or usages might lose their relevance. Therefore, translating from an ancient language to another classical language requires great scholarship if one were to convey the true intended meaning of the original writer.

The book opens with a prayer in four languages, Persian, English, Saṃskṛtaṃ and Telugu. The poem was written in the Kaṅdaṃ metre, one of the toughest prosodies in the Telugu language. Writing a poem in difficult prosody, with each line in a different language is an expression of Nārāyaṇa Dās' penchant for accomplishing the formidable.

He introduced Omar Khaiyâm, the poet and his poetry in three languages, English, Saṃskṛtaṃ and Telugu. He used the introductions to express his deep admiration for Omar Khaiyâm and his poetry. But the introductions were more than that. Nārāyaṇa Dās used

In Public domain. Digitization Muthulakshmi Research Academy

them to express his own worldview about his field of work; poetry and poets; literature and literary criticism and the contemporary socio-political milieu. He begins the Saṃskṛtaṃ introduction by describing the qualities a literary critic should possess.

Just as the reasons are understood from a deed, so should a poet be judged by his literary work. A critic should not blindly go by what others say of a poet but must be capable of independent thinking and judging the merit of a work. He should be erudite, having read and imbibed many kāvyās and must be proficient in languages like Saṃskṛtaṃ and Prākṛtaṃ. A critic who is himself a poet or writer would be better equipped to judge the work of others.[iii]

On can't help wonder if he hadn't read his own qualities (such as an encyclopaedic knowledge of the Vēdās and Śastrās, an exquisite poet, musician, dancer, actor et al.) into the qualities desirable in a critic and in his unstinted praise for Omar Khaiyâm. His description of Nišâpur reflects the literary and cultural milieu of Vijayanagaraṃ. He laments the diminution of ethical and moral standards and corruption of culture, following hundreds of years of alien rule.

The people of this land which came to be known as 'karma bhūmi' have lost their independence. They

In Public domain. Digitization Muthulakshmi Research Academy

have had to abandon their traditional education and discipline. Having somehow acquired a degree in an alien language they were able to occupy positions of power. Those who do not have a modicum of knowledge of Saṃskṛtaṃ and are incapable of writing anything in Saṃskṛtaṃ or Prākṛtaṃ have come to be celebrated as litterateurs. Thanks to the ambience created by the unenlightened officials and uneducated rich, a wicked person has come to be seen as virtuous and a mountebank is seen as noble.

The introductory essay is rich in the philosophy of Sanātana Dharma and explains the nature of human existence and its relationship with godhead. It expostulates on the need for virtuous living.

The (human) creature is devoid of self-knowledge. Man has no role in determining (his own) weal or woe. It is Īśwara who decides whether he would end up in heaven or hell. A man attains advaita jñānaṃ only by of the grace of Īśwara. It is not possible to realise Viṣṇu without bhakti.

The synonymous use of Īśwara and Viṣṇu in the passage emphasizes the essence of Advaita philosophy as "[T]he identification of the Self with Brahman and the absolute reality of one and only one existence."[iv]

In Public domain. Digitization Muthulakshmi Research Academy

Bhakti is jñānaṃ that combines the following qualities: being happy without ego; not looking for rewards; not craving for anything;

In his English introduction, he expresses the view that 'an original writer' should take 'pride in having his works published as they are so that critics might see him in his true colours'. It was for this reason, he says, "It is not my habit to have my works corrected and recast by others". He laments the propensity of literary critics to judge the work of writers based more on their outward appearance than a true evaluation of their literary work. Could Fitzgerald's impression of how Omar lived his life have coloured his translations of the poet's immortal verses?

Did Nārāyaṇa Dās find a twin soul when he observed that Omar Khaiyâm decried 'all religious shows and philosophical discussions' as 'merely vain and whimsical actions for passing an idle life'? He says Khaiyâm was vexed with the deep chasm between precept and practice of crafty philosophers. He therefore satirized their philosophy. For him pleasing society was true religion and devotion to Almighty was the happiest enjoyment. It was perhaps because of this perception that Nārāyaṇa Dās found in Khaiyâm, a mystic rather than a romantic poet. He feels Khaiyâm's philosophy was largely misunderstood and his

In Public domain. Digitization Muthulakshmi Research Academy

advocacy of 'wine, woman & music' should be read as cryptic symbols for 'divine service, pure mind and meditation'.

Nārāyaṇa Dās translated Omar Khaiyâm's Rubâiyât when he was well into his sixties and published the book when he was sixty-eight. This was what Sarvēpalli Rādhākṛṣṇan, former president of India, then Vice-Chancellor of Andhra University, had to say of the translations in his 'FOREWORD':

"[...] was greatly struck by his varied talents, remarkable linguistic equipment, and technical power of versification. [...] The Telugu verses are written in what is called Acca Telugu or pure Telugu, which is rather difficult. [...] I am tempted to congratulate him on a performance which, taking all things into account, is certainly astounding."

In a rare honour, *The Hyderabad Bulletin*, a British era newspaper published from Hyderabad, reviewed the book in an editorial entitled, "A Monument of Scholarship". Here are some excerpts:

"[A] careful perusal of the book fills us with admiration at the astounding scholarship of the learned Paṅdiṭ.

"There are, of course dozens of translations of the immortal "Rubâiyât", the most popular and

In Public domain. Digitization Muthulakshmi Research Academy

probably the best known being that of Edward Fitzgerald. Paṅdiṭ Nārāyaṇa Dās, who frankly expresses the opinion that Fitzgerald's work is not a literal translation, has gone back to the original Persian in order that the letter and the spirit of Omar Khaiyâm may not be missed.

"In these degenerate days when scholarship has fallen on evil times, it is incredible to learn that a Hindu, with Telugu as his mother tongue, should have been so filled with admiration for a Persian poet that, after he had passed his sixtieth year, he took the trouble to master so alien a language, and translate the masterpiece not only into Telugu but into another classical language, Saṃskṛtaṃ.

"We find in the book that while Fitzgerald's translation is rendered into Saṃskṛtaṃ and into Telugu of the Kaṅdaṁ metre, the hardest perhaps in the Telugu prosody, Omar Khaiyâm's original text is again translated into Gīti and the Bhujangi metres.

"We find in the book that while Fitzgerald's translation is rendered into Saṃskṛtaṃ and into Telugu of the Kaṅdaṁ metre, the hardest perhaps in the Telugu prosody, Omar Khaiyâm's original text is again translated into Gīti and the Bhujangi metres.

In Public domain. Digitization Muthulakshmi Research Academy

"We are certainly unaware of any recent instance in India where so much learning has been brought to bear on what is no less certainly a labour of love, for it is evident that there are few persons familiar with the Saṃskṛtaṃ language who are anxious to have a rendering of the Persian original.

"Paṅdiṭ Nārāyaṇa Dās' erudition is enhanced by the fact that even in using his own mother tongue, he has selected what is called Acca-Telugu, a language that only a handful can understand. The work therefore is not intended for the masses, and the learned author expects no profits out of his scholarship.

"But literature transcends the limitation of language, age and country, and it is most gratifying that a Telugu writer of the twentieth century should have paid the most splendid tribute to a Persian Poet of the twelfth century. He has added a most copious glossary at the end of the book to facilitate an appreciation of the original, its translation by Fitzgerald, and the author's own translation into Saṃskṛtaṃ and Telugu.

"In inviting the attention of H.E.H. the Nizam's Government to the Paṅdiṭ's work, we trust that, in consonance with their liberal support of classical scholarship; they will extend their patronage to the

In Public domain. Digitization Muthulakshmi Research Academy

Paṅdiṭ, and thus bring about a sympathetic understanding and interpretation between the two ical languages."

The first edition of *Rubâiyât of Omar Khaiyâm* was published in 1932[v] and a second edition by the Sahitya Akademi in 2012. The book in four languages has the original Persian text, its English transliteration with diacritical marks, Fitzgerald's English translation, Saṃskṛtaṃ and Acca-Telugu translations of Omar Khaiyâm's original text and Fitzgerald's translation. It is a veritable collector's item.[vi]

---

[i] Old Persian was an Iranian language which was in use from circa 600 B.C.E to 300 B.C.E. The next phase in the evolution of the language between 300 B.C.E. and 800 C.E. has been designated Middle Persian and from 800 C.E. it is known as Modern Persian or Farsi.

[ii] By Yavana terms Nārāyaṇa Dās was probably referring to 'Middle Persian'.

[iii] The gist of Nārāyaṇa Dās' Saṃskṛtaṃ introduction entitled "Umara Kaviprasaṃsā" is based on the Telugu translation of the Saṃskṛtaṃ part of the work by Yāmijāla, Padmanābhaswāmi (1982).

[iv] Swami Prabhavananda. (1963). *The Spiritual Heritage of India.* p. 274

[v] The year of publication was not mentioned in the book, but going by the date of Sarvēpalli Rādhākṛṣṇan's "Foreword" it can be deduced that it was published in 1932.

[vi] A character in Bernard Shaw's play *Saint Joan* (Scene IV) soliloquises: "Now this is what I call workmanship. There is nothing on earth more exquisite than a bonny book, with well-placed columns of rich black writing in beautiful borders, and illuminated pictures cunningly inset. But nowadays, instead of looking at books, people read them.

{Upadhyayula Narayana Das is a researcher and blogger, and author of "Twisting Facts To Suit Theories And Other Selections From Voxindica" (2017), a trenchant critique of the Indian media and historiography. He is the great grandson of Sri Adibhatla Narayana Das.}

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

APPRECIATIONS

A MONUMENT OF SCHOLARSHIP

We have pleasure in acknowledging a copy of the "Rubaiyat" of Omar Khaiyam, translated into Sanskrit and Telugu by Pandit A. Narayandas, retired Principal of Sri Vijayarama Gana Pathasala, Vizianagaram, and a careful perusal of the book fills us with admiration at the astounding scholarship of the learned Pandit. There are, of course, dozens of translations of the immortal "Rubaiyat", the most popular and probably the best known being that of Edward Fitzgerald. Pandit Narayandas, who frankly expresses the opinion that Fitzgerald's work is not a literal translation, has gone back to the original Persian in order that the letter and the spirit of Omar Khaiyam may not be missed. In these degenerate days when scholarship has fallen on evil times, it is incredible to learn that a Hindu, with Telugu as his mother-tongue, should have been so filled with admiration for a Persian poet that, after he had passed his sixtieth year, he took the trouble to master so alien a language, and translate the master-piece not only into Telugu but into another classical language, Sanskrit. We find in the book that while Fitzgerald's translation is rendered into Sanskrit and into Telugu of the Kandam metre, the hardest perhaps in the Telugu prosody. Omar Khaiyam's original text is again translated into Giti and

In Public domain. Digitization Muthulakshmi Research Academy

the Bhujangi metres. We are certainly unaware of any recent instance in India where so much learning has been brought to bear on what is no less certainly a labour of love, for it is evident that there are few persons familiar with the Sanskrit language who are anxious to have a rendering of the Persian original. Pandit Narayandas's erudition is enhanced by the fact that even in using his own mother-tongue, he has selected what is called Atchha-Telugu, a language that only a handful can understand. The work therefore is not intended for the masses, and the learned author expects no profits out of his scholarship. But literature transcends the limitation of language, age and country, and it is most gratifying that a Telugu writer of the twentieth century should have paid the most splendid tribute to a Persian Poet of the twelfth century. He has added a most copious glossary at the end of the book to facilitate an appreciation of the original, its translation by Fitzgerald, and the author's own translation into Sanskrit and Telugu. In inviting the attention of H.E.H. the Nizam's Government to the Pandit's work, we trust that, in consonance with their liberal support of classical scholarship; they will extend their patronage to the Pandit, and thus bring about a sympathetic understanding and interpretation between the two classical languages.

- The Hyderabad Bulletin,
16-1-1937

In Public domain. Digitization Muthulakshmi Research Academy

उमरकविप्रशंसा

यथा कार्येणैव कारणमूह्यं स्यात्तथा काव्येनैव कविर्विमर्शनीयो भवेत् । मूढः परप्रत्ययनेयबुद्धिर्ज्ञानलवदुर्विदग्धः खट्वारूढः कविम्मन्यो न जातु कविं विमृशेत्। काव्यपरिशोधनेनैवोपज्ञालङ्कृतः सरस्वत्युभयपयोधरपानमत्तश्चतुर्विधाभिनय परवशीकृतसर्वलोकः सकलसंस्कृतप्राकृतभाषविशेषप्रतिभासमञ्चितः शश्वन्नानाविधप्रबन्धनिर्माणचातुर्यवैभवार्जितनिस्तुलयशः सम्पूर्णाखिलदिगन्तः परमभागवतोत्तमः परिणतवयाः सर्वतन्त्रस्वतन्त्रः कविरेव कविं नेत्रं नेत्रमिव परीक्षेत। तत्र भवानुमराख्यः प्रसिद्धपारसीककविरमरसिंहकविसमकालिकः पदवाक्यप्रमाणपारावारीणः सङ्गीतसाहित्यविद्याधुरीणः पण्डिताग्रणीर्नवरस रसिकग्रामणीः कन्दर्पसुन्दरस्तृणीकृतपुरन्दरः साधितभक्तिज्ञानवैराग्यसर्वस्वः पञ्चह्रस्वः प्रबुद्धनिखिलग्रहचारार्घः पञ्चदीर्घः समस्तैहिकसुखभोक्ता सन्ततयथार्थवक्ता सर्वशास्त्रप्रचारकः सदोभयलोकसन्तारकः किंबहुनोमरोऽमरकविर्वा यवनाचार्य एवेति मन्यामहे। लोकोत्तर चरित्रशाल्युमरकविसदृशः पुरुषो जगति न भूतो न भविष्यत्येव। पारसीकदेश प्राच्यभागस्तन्महानुभावस्य जन्मभूमिरुत्तरेण गान्धारदेशं भूतलस्वर्गप्राया द्राक्षादाडिमादिमधुरफलरसास्वादनीया नानाविधपुष्पसौरभप्रसिद्धासन्ततृणकाष्ठजलसमृद्धा सकलवेदशास्त्रास्थानी जगज्जेगीयमान सार्वभौम राजधानी रसवद्यमककाव्यरचनेवानन्यसुलभसाध्या सज्ञनाराध्यास्ति। ततो भवान् शतहायनः सम्प्राप्तसकलदेशाधीशोपायनः स्वकाव्ये ''सुराशक्तिः शिवोमांसं तद्भक्तो भैरवः स्मृतः'' इति रुद्रयामलन्यायाच्छुद्धाद्वैतमतमवलम्ब्य ''हरिरेव जगज्जगदेव हरिर्हरितो जगतो न हि भिन्नतनुः। पुरुष एवेदं सर्वम् । अहं ब्रह्मास्मि । ब्रह्मैव संसरति मुच्यत एतदेव दौवारिकं भवति संसरणञ्च तस्य, मुक्तिः पुनर्भवति चिद्वपुषैव तस्य स्वाज्ञानतः स्वमहिमप्रतिबोधतश्च'' इत्यादि श्रुतिस्मृतिपर्यालोचनया विरज्य स्वार्थ

In Public domain. Digitization Muthulakshmi Research Academy

परदाम्भिकयायजूकाञ्जपूकानपि सुतरां निरस्य भागवतमतमवालम्बिष्ट। सम्प्रत्यष्टमशनिवशीभूतकर्मभूमिजना यतः पराधीना नितरामपि पतिता अत्यन्तविपरीतबुद्धयः केवलात्मम्भरयः सुतरांम्मितम्पचा वर्णाश्रमधर्म परिभ्रष्टाः स्वार्थैकपरायणाः पाषण्डीकृताः पौरुषशून्या धनसम्पादनार्थमकार्यमपि कुर्वन्तः पाश्चात्याचारमनुसरन्तः शिष्टप्रमाणमधिक्षिपन्तः सहसा म्लेच्छभाषा परीक्षोत्तरण मात्रेण लब्धाधिकारपदप्राप्त्यारूढाः किंकर्तव्यतामूढा वर्णसङ्कारा नीचकिङ्करा-स्सर्वज्ञम्मन्या अतीव निर्लज्जा ऊनविंशतिवर्षा पक्वयस्का अपि येनकेनाप्युपाये-नार्जितदुर्मदाधिकारा नाट्यवेदपारगानपि चतुर्विधाभिनयविशारदान् सर्वजनरञ्जकान्नानाविधसंस्कृतप्राकृतकाव्यकन्यारत्नदातॄन् सर्वतन्त्रस्वतन्त्रानति क्रम्यानाघ्रातदेवभाषागन्धलेशा अप्यविदितभावरागताला अप्यचुम्बितश्रुतिलया अप्यनास्वादितचतुःषष्ठिकलारसा अपि गीर्वाणभाषाकाव्यविशेषरचनासामर्थ्य-विहीनं म्लेच्छितानुवादितापभ्रंशग्रन्थकारं कविसार्वभौमाख्ययापि सङ्गीतज्ञानशून्यं नाट्यकलाप्रपूर्ण नाम्नापि भ्रुकुंसमभिनवभरताचार्याह्वयापि शुष्कयन्त्रवादकं सङ्गीतभूषणाभिधानेनापि शुकानुवादिनं वेदार्थवाचस्पति नामधेयेनाप्यपलपन्ति। मूढेनाप्यधिकारिणा पामरेणापि धनिना दुष्टोऽपि शिष्टायते हीनोऽप्यनूचानायते।

"लयान्तरप्रयोगेण रागैश्चापि विवेचितम् ।
नानारससुनिर्वाह्य कथं काव्यमिति स्मृतम् ।
तस्माद्विद्वान्प्रेव वदेत् वीवनृत्येत् ।
दानकामा अस्मै प्रजा भवन्ति ।।

वीणावादनतत्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ।
देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम् ।
मूर्छयित्वा हरिकथां गायन्नेवं चराम्यहम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

यथा नयति कैलासं न गङ्गा न सरस्वती ।
तथा नयति कैलासं न गङ्गा न सरस्वती ।
ये ते शतं मानुषा आनन्दाः ।
स एको मनुष्यगन्धर्वाणामानन्दः।
नृत्यगीतादिकुशला गन्धर्वास्स्यु ।
र्नृलौकिकाः नागन्धर्व सुरूपधृत्'' ।। इत्यादि

श्रुतिस्मृतिविध्युत्सर्गवाक्यान्यनादृत्य गान्धर्ववेदबाह्याः सम्प्रति वाचाटा यथाकथञ्चिदप्यपभ्रंशमूकाक्षरविन्यासेनैव पामरान्प्रतारयन्तः कवय इव बहु रसिका इव काव्यविमर्शका इवापस्वरेण घूकायन्ते।

''ये शुष्काध्ययनासक्ता ये च शास्त्रविचिन्तकाः।
सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः'' इति न्यायाद्यः स्वविरचित विविधानवद्यहृद्यगद्यपद्यगेयकाव्यशतानि स्वयमेव गायन्नृत्यन् रञ्जयति पण्डितपामरोभयमहासमाजान्स एव कविनामार्हति। नाट्यवेदानभिज्ञः केवलनिर्जीवपुस्तुकप्रतिमावलोकनव्यसनासक्तः सभारञ्जकाभिनयप्रयोगशून्यः पाकरसं दर्वीव काव्यरसं न जातु जानात्यत एव केचिद्विमर्शकम्मन्या उमरः कविशेखर इति परमभागवतोत्तम इत्यपि न विजानन्ति निगदितं हि खलु भवभूतिकविना ''मम कोऽपि समानधर्मेत्यादिना। विद्वानेव विजानाति विद्वज्जनपरिश्रमम्। नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्'' इति वचनानुसारतः केनचिदपि श्रुत्युक्तविधिना नृत्यन्गायन्यः स्वकल्पितकाव्यकलापैः सभास्तारान् रञ्जयति स वेदविद्भूसुर एव विद्वान्। लोके तावत्सहजपाण्डित्यः कदापि सकृदेव जरीजृम्भते। सम्प्रत्येतत्काव्यपरिशीलनेनोमरः कविरिति निर्दिशामः। विनैवाभियोगादिना सर्वविद्यापारगः सहजपाण्डित्यविशारद एव साधुत्वपरिज्ञाने प्रमाणम्। ''आविर्भूतप्रकाशनामनुपप्लुत चेतसाम्। अतीतानागतज्ञानं प्रत्यक्षान्न विशेष्यते। अतीन्द्रियानसंवेद्यान्पश्यन्त्यार्षेण चक्षुषा। ये भावान् वचनं तेषां नानुमानेन बाध्यते''तस्मादस्माद्दशैर्भागवतैर्यथार्थमेवेश्वर कृपया निर्दिश्येत। रसिकशेखरैर्नाना-

In Public domain. Digitization Muthulakshmi Research Academy

देशाधिपैरुग्रकविः सम्प्राप्तसमस्तविभवोऽप्यनन्यसाधारणनित्यसन्तुष्ट्या वानप्रस्थो भवन्शिवशक्त्यात्मकजगदाराधनमेव यावज्जीवमकार्षीत्। दैवभक्तिरेवोमरक-विनोद्दिष्टसुरेति श्रद्धैव तस्य पानपात्रीति निश्चिनुमः। अर्धग्रासोऽरण्यनिवासः सन्ततशिवशक्ति नामाभ्यास एवोमरकविनाकाङ्क्षि।

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वाश्वभ्रमेव वा ।
ईश्वरानुग्रहादेव पुंसामद्वैतवासना ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः।

भक्त्याहरिमुपास्ते।
निरतिशयानन्दप्रियानन्यप्रयोजनसकलेतरवैतृष्ण्यवज्ज्ञानविशेषो भक्तिः।
भक्तिर्ज्ञानाय कल्पते।

सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतांश्च भगवत्यात्मन्नेष भागवतोत्तमः।
नाद्वैतज्ञानवतः कर्माणि विधीयन्ते ।
मायामात्रमिदं विश्वमद्वैतं परमार्थतः।

सर्वमात्मैव खलु कं केन पश्येत् ।
विज्ञातारमरे को विजानीयात् अहङ्कारविमूढात्मा कर्ताहमिति मन्यते।
केनापि देवेन हृदि स्थितेन यथानियुक्तोऽस्मि तथा करोमि ।
साक्षी चेताः केवलो निर्गुणश्च ।
कर्ता भोक्ता जनार्दनः।
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
अयमात्मा ब्रह्म ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति।

In Public domain. Digitization Muthulakshmi Research Academy

पुङ्खानुपुङ्खविषयेक्षणतत्परोऽपि ब्रह्मावलोकनधियं न जहाति योगी।
नासदासीन्नोसदासीत्तम आसीदिति श्रुतिः।
परमार्थदशायां न वेदाः सन्ति। पदार्थतत्वज्ञानादेव निश्रेयसावाप्तिः। इति श्रुतिस्मृतिशतपर्यालोचनयोमरकविः स्वकाव्यरूपेण बालावबोधाय परमार्थमुपादिक्षत्। तथाह्येवमस्तु ''प्रकृतमनुसरामः पायसं भक्षयामः'' क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ। प्रतिक्षणविजृम्भणादु-भयबाहुकूलङ्कषस्तनन्नुटितकञ्चुकं नमत यौवनं योषितः। मानुषाणामिदं पथ्यं पयःपानं वयः स्त्रियः इति ''प्रत्यक्षविषयमगणयित्वा किं ब्रह्मजिज्ञासया गगनारविन्दगन्धजिघ्रासयेव।

अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।
ललाटलखिता लेखा परिमार्ष्टुं न शक्यते ।।

इति मत्वा भूतं मास्माषीर्भाव्यमपि माचिन्तीः केवलं दैवकृतं साम्प्रतं सुखं वा दुःखं यथातथापि त्वयानुभोक्तव्यमेव किं वृथा तर्केण दोधूयसे

''यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम्''

इति सर्वज्ञः सर्वशक्तिर्भगवान्स्वांशीभूतस्य जीवस्य यथेच्छया नानाविधोपाधिजालं सृजन्नपि पुनः पुनर्नाशयन्सहजलीलया क्रीडति

''दैवाधीनं जगत्सर्वं मन्त्राधीनन्तु दैवतम् ।
तन्मन्त्रं ब्राह्मणाधीनं ब्राह्मणो मम देवता ।
सर्वत्र दान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः
प्राणिवधे निवृत्ताः प्रतिग्रहे सङ्कुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः''

इत्युमरकविः सप्रमाणं स्वकाव्येन पशुमारणकर्मदारुणंछान्दसमाक्षिपन् सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज'' इति भगवद्वाक्यमनुसृत्य भगवद्भक्तिसुधापानमत्तः श्रद्धाकान्तां परिरम्य जीवन्मुक्तोऽभूदित्यूहामहे। यत

In Public domain. Digitization Muthulakshmi Research Academy

उमरः कविरपि सिद्धान्तिचक्रवर्ती ततो ज्योतिषां पतेः सूर्यस्य त्रयीमूर्तेर्नाम स्वकाव्यमुखे समुपापादि ''पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले। पतन्नपि पुनः पीत्वा जीवन्मुक्तो न संशयः'' इति लौकिकवचनतत्वं विज्ञाय ''तस्माद्योगी भवार्जुन। भक्तियोगः प्रशस्यते'' इति सम्यङ्निश्चित्य भागवतोऽभूत्तं भागवतोत्तमं कर्मिष्ठाश्छान्दसास्सुतरामरसिकाः कर्मबाह्य इत्याक्षेप्सुरत एवैतत्काव्यव्याजेन स महात्मा श्रोत्रियं मन्यांस्तान्दम्भाचारान्सङ्गीतसाहित्य-रसानभिज्ञान् पशुप्रायानप्येडमूकान्प्रत्यचिख्यपत्।

''यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः।
सर्वं विष्णुमयं जगत् रसो वै सः।
रसं ह्येवायं लब्ध्वानन्दी भवति ।।''

इति विदित्वा। रे देवानांप्रिय दारुणकर्माव्युत्पन्नारसिकवैदिकम्मन्य किम्मुधात्वत्परिमितायुः समयापयसि नृत्यन्गायन्भक्तिपारवश्येन सर्वसंसारदुःखं विस्मृत्य मुक्तिकान्तागाढसमाश्लेषणेन जीवन्मुक्तो भवेति प्रबोधयन्नेतत्काव्यं विरचय्य स्वयमभिनीय भागवतमतमवूबुधत्। स प्रत्यक्षबृहस्पतिर्दैवज्ञशिरोमणि-र्नैयायिकाग्रीयो नानाविधगणितशास्त्रग्रन्थानररचदपि स्वजन्मदेशेऽपूर्वनक्षत्रशालां निरमीमपत्। ''योगेनान्ते तनुत्यजाम्'' इति न्यायादपि ''ब्रह्मविदाप्नोति परम्। ब्रह्मविद्ब्रह्मैव भवति।'' इति श्रुतिविज्ञानाद्ब्रह्मण्येव व्यलेष्ट। तत्र भवान् यवनशब्द-सम्मिलितमप्येतत्काव्यं प्राचीनपारसीकभाषयैव व्यरचि। प्राचीनपारसीकभाषा प्रायशः प्राकृतविशेष एवेति मन्ये। अस्मिन्ग्रन्थे भूतकालार्थविषये मया लुङेव प्रायोज्यव्ययचाक्षरोऽप्यनिषेधीति शिवम्।

- अज्ञाडादिभट्ट नारायणदासः ।

In Public domain. Digitization Muthulakshmi Research Academy

।। सुप्रभातम् ।।

श्लोकः ।। प्रबोधय प्रभातो नक्षत्रण्यन्तरदीधपत् ।
इनोऽक्षैप्सीन्नवीनांशुजालं राजगृहोपरि ।।

गीतिः ।। सूर्यः प्रभातजालं गृहोपरितले समन्ततोऽक्षैप्सीत् ।
दिनपतिरप्यास्थत्प्रस्थानमणिं भाजने प्रयाणाय ।।
प्रातः सजागरूकः प्रतिहार्यप्यहरहः स उत्तिष्ठन् ।
पिब हालामित्युच्चैर्व्यजिज्ञपत्सम्भ्रमेण कर्तव्यम् ।।

२

श्लो ।। गते मायाव (?) तमसे प्रातः पानमजागदीत् ।
हृदिस्थं दैवतं मूढ गवेषयसि किम् बहिः ।।१।।

गी ।। प्रातश्श्रुतमाह्वानम् शुण्डायास्तिष्ठ रे सुरापायिन् ।
पूरय पात्रं तूर्णं न यावदसुभाजनं भवति पूर्णम् ।।

श्लो ।। पानागता अवोचन्मां बोधावुषसि घोषति ।
उन्मीलय कवाट द्राग्नावर्तन्ते गताः पुनः ।।३।।

गी ।। मधुवारोऽयम् प्रातः पायय मां पात्रि कुक्कुटो रौति ।
पानस्य नौ सुराया अहो बतात्रैकदा समावेशः ।।
न हि दीक्षावसरोऽयम् मा शोचीरीदृशं वृथा पात्रि ।
धर्मस्य काद्य चिन्ता पिब हालासारमखिलमयि पात्रि ।।

In Public domain. Digitization Muthulakshmi Research Academy

३

पातव्यं मृद्वीकं कर्तव्यं हृदयवाञ्छितं सफलम् ।
तावकजीवितकालावधिर्भवेदेव जगति विस्पष्टः ।।

अयि हृदयानन्दनिधे सत्वरमुत्तिष्ठ सुप्रभातोऽयम् ।
मन्दम्मन्दम् मद्यं पीत्वा वादय विपञ्चिकामद्य ।।

नष्टस्पृहश्शयालुः कथमैहिकभोगभाग्यभाग्भवति ।
नहि शक्यते गतासुर्देही निजवाञ्छितं पुनर्भोक्तुम् ।।

प्रत्यूषस्सम्प्राप्ता जागृहि बाले नवीनगुणजाले ।
मधुनाधुना समन्ताद्रक्तीकुरु काचभाजनं स्वच्छम् ।।

अन्याधीनं क्षणिकं सत्यापनमैहलौकिकं वित्तम् ।
अन्वेषयन्नपि चिरं कामितमाप्तुं न शक्यसेऽत्यर्थम् ।।

४

श्लो ।। नूल्नोऽभूत्प्रत्नसङ्कल्पो रहस्यं चित्तमीप्सति ।
मुनयो यत्र तप्यन्ते तत्र मोक्षामहे वयम् ।।४।।

गी ।। अयमवसरो विहर्तुं समुत्सुकानां वनेषु सर्वेषाम् ।
प्रतिविटपं सौन्दर्यम् प्रतिगन्धवहं चकास्ति सौहित्यम् ।
नववासन्तिकमन्दानिलेन सम्प्रत्यलङ्कृतं भुवनम् ।
वर्षेप्सया जलधरं पश्यत्युन्मीलितेक्षणेनेदम् ।

In Public domain. Digitization Muthulakshmi Research Academy

५

श्लो ।। नाममात्रावशिष्टा विभ्रष्ठा नष्टाः पुरा नराः ।
अद्यापि फलिता द्राक्षा पुष्पिता वनमाल्लिका ।।५।।

गी ।। कस्मैचिदपि रहस्यं नहि विज्ञापयति कालचक्रमिदम् ।
विंशतिसहस्रगुणितान् गमयति महतोऽपि यमपुरम् मर्त्यान् ।
गन्धोत्तमां ततः पिब जन्तोर्नायुर्द्विवारमुपदत्तम् ।
जगतः प्रयाति योऽतः स्वभावतः सन् पुनः समायाति ।

श्लो ।। कोऽप्यालपन्नागरकं माध्वीशब्दं विमुह्यति ।
पल्लवस्पृहया गायन्कोकिलो लोहितायते ।।६।।

६

गी ।। दिनमत्यन्तसुखकरं समशीतोष्णमपि भवति गन्धवहः ।
सम्माष्टिं बाष्पपूर्णं पयोधरः पुष्पवाटिकावदनम् ।
संस्कृतवाण्यात्युच्चैर्मुहुर्मुहुस्समुपदिशति परपुष्टः ।
सौगन्धिकं तृषार्तं मद्यमवश्यं त्वया निपेयमिति ।

श्लो ।। पात्रं संपूरयायाहि किं तपस्यसि यौवने ।
पश्योड्डीनोन्मुखो जीवपक्षी दोधूयते बलात् ।।७।।

गी ।। नवनवविकसितपुष्पासवमद्भुतमानयेम मयि पात्रि ।
सत्वरमेहि धुनीहि क्रतुव्रतकठोरकर्म हे पात्रि ।।

भुजङ्गी ।। डयिष्यन् । धुनोति ।
स्वपक्षौ । पतत्री ।

In Public domain. Digitization Muthulakshmi Research Academy

७

श्लो. ।। यथाकथञ्चिन्नश्येत यत्रकुत्रापि जीवितम् ।
सुखदुःखविमिश्रायुर्मार्द्वीकं बिन्दुशः क्षरेत् ।।८।।

गी. ।। प्राणप्रयाणसमये सव्यं स्याद्वाऽपसव्यमपि शीर्षम् ।
अमृतेन वापि हालाहलेन पूर्येत पानपात्रमिदम् ।।
पिब मृद्वीकमयं नावनन्तरं सञ्चरेन्मुहुश्चन्द्रः ।
राकाप्रभृति कुहूपर्यन्तं सर्वान् समापयेन्मासान् ।।
गृह्णीतास्मत्पात्री सुदृढं हस्तेन चषककण्ठबिलम् ।
अथवासवासवः प्रष्यन्देयुर्विवृतभाजनोष्ठपुटात् ।।
तत्क्षण एवाहं यदि मृत्युसकाशात्पलायितुं शक्ये ।
भूयो विभ्राम्येयं द्राक्षाविटपाद्यथा शिथिलपत्रम् ।।

८

श्लो ।। यद्यद्याब्जशतं जातं किमभूदैषमोंऽबुजम् ।
विकासयन्कुन्दमेष वसन्तोऽद्रिमनीनशत् ।।९।।

गी ।। सम्प्रत्युपविश कुसुमच्छायेऽस्मिंस्त्वं यथासुखं नोचेत् ।
पात्येत सुमं बहुशः प्रभञ्जनेनापि मृदि विनश्येत ।।
पुष्पसमयागमेनाञ्जसैव हेमन्तऋतुविपाकेन ।
अभिवर्धन्तेऽपि प्रक्षीयन्ते नोऽसवो दलानीव ।।
प्रारभमाणवसन्तः क्रमशः प्रक्षीयमाणहेमन्तः ।
जनयति विनाशयति वा सहस्रशश्चक्रवर्तिनो भूमौ ।।

श्लो ।। यथातथा वा विद्येरन् लोकसृष्टिस्थितिव्ययाः ।
वयं तटस्था मा शोचीः स्वभावो हि प्रवर्तते ।।१०।।

In Public domain. Digitization Muthulakshmi Research Academy

९

गी ।। यावद्युष्मद्देहेऽस्थिस्नायुर्धमनिरपि विराजन्ते ।
तावन्माकार्षीस्त्वं भाग्यनिवासाद्बहिः पदक्षेपम् ।
मानी नमस्तव गलो यदि ते शत्रुर्महाबलोऽपि स्यात् ।
मानुग्रहमाकार्षीर्भवेत्सुहृच्चेत्स धर्मराजोऽपि ।।

श्लो ।। न चेन्मद्यं पिबेर्मत्तान्मा निन्दीः पापमेव तत् ।
पानादपि क्षुद्रकर्म कुर्वन् किं श्लाघसे स्वयम् ।

गी ।। मा कुरु मैत्रीं केनाप्यद्य दविष्ठो भवाखिलजनेभ्यः ।
यस्मिन्ननुरक्तः स्याः स एव तव तत्वतो भवेच्छत्रुः ।
तेऽद्य सुरार्चक इति मां वावद्यन्तेऽहमपि तथैवास्मि ।
वावच्यन्ते पापी कामुक इत्यप्यहं तथैवास्मि ।।

१०

मा त्वं दरीदृशीर्मम केवल बाह्यस्वरूपमित्थमिति ।
अहमपि मदन्तरङ्गेऽत्यन्तनिगूढे यथा तथैवास्मि ।
एकं पाणिमपि श्रुतिकोशे न्यस्येतरं करं चषके ।
विहितं निषिद्धकर्माण्याचारि पुनः पुनर्मया सपदि ।
मामकपुराणसचिवोत्तंसामां यूयमद्य शोश्रोत ।
मा चाचर्चीतेदं गोलमसद्रूपकं वृथैवैवम् ।
शरणागतरक्षणपटुसमभूकोणे विविक्षतस्वस्थाः ।
चित्रं प्रपञ्चनटनं समुदासीनाः सदा दिदृक्षध्वम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

११

श्लो ।। अरण्यग्राममध्यस्थे वने निवसतो मम ।
येनकेनापि सम्बन्धो न ह्यल्पेनाधिकेन वा ।।११।।

गी ।। यद्यद्य सम्भवेदिह बन्धुरगोधूमनवरसापूपः ।
मधुपूर्णपानपात्रं किं वक्तव्यः पुनर्ममानन्दः ।
त्वमहमपि रहःप्रत्यहमिह महिले सहवसेव महितवने ।
अतिरिच्यते न किं नौ मुदा तदा चक्रवर्तिनः प्रमदः ।

श्लो ।। इक्षुच्छायेकदुष्णान्नमभीष्टं मधुपुस्तुकम् ।
त्वमत्र यदि गायन्ती नूनं स्वर्गायते मही ।।१२।।

१२

गी ।। अरुणासवमपि काङ्क्षे महाकविकृतानि चाटुकाव्यानि ।
अर्धग्रासमवश्यं प्रोत्सहतां मामकान्त्यनिश्वसितम् ।
अप्यनवरतमहं त्वं परिरभ्य परस्परं वसेव रहः ।
शतशतकोटिगुणं स्यादिदं वनं चक्रवर्तिनः सौधात् ।

श्लो ।। श्लाघतेऽप्सरसंयज्वा वयं द्राक्षारसं स्तुमः ।
श्राव्या भवेद्दूरभेरी पिब हस्तगतामृतम् ।।१३।।

गी ।। नित्यं स्वर्गनगर्यां रम्या अप्सरस इति वदन्त्येके ।
द्राक्षासव एवायं मनोज्ञ इति सर्वदा प्रशंसामि ।
हस्तगतं मात्याक्षीः पस्पृहथामाभविष्यदर्थाय ।
कामं भ्रातः श्राव्यः स्यादेव दविष्ठदुन्दुभिध्वानः ।।

In Public domain. Digitization Muthulakshmi Research Academy

१३

आस्तां त्रिविष्टपमपि स्वर्गङ्गासन्ततं ततःप्रभवेत् ।
मार्द्वीकमतिस्वच्छं मैरेयं विद्यतामपीक्षुसिता ।
पूरय चषकं परितो गन्धोत्तमयाशये निवेशय मे ।
हस्तगतं वित्तं स्याद्भविष्यदर्थात्सहस्रगुणमेव ।
सर्वेऽपि यायजूका महाकुलागर्वपर्वतारूढाः ।
नश्यन्त्यसम्भवत्स्वर्वेश्याप्रासादलम्पटा धूर्ताः ।
जातु न जानेऽहमहो मामस्राक्षीदिहैव यःकोऽपि ।
स्वर्गाय वापि भीकर नरकायापि स्वयं नियुञ्जीत ।
मृष्टान्नमपि श्यामा केदारतले हलिप्रियापानम् ।
मम धनमेतत् त्रितयं छान्दस तव भाव्यनिश्चितः स्वर्गः ।

१४

श्लो ।। लूतावत्किं प्राणतन्तून्विसृजामि वृथाशया ।
न जाने मे संस्थितस्य पुनर्जन्मास्ति वा न वा ।।१४।।

गी ।। हन्त कियत्पर्यन्तं सुखमपि दुःखं विचिन्त्य दोधूये ।
स्वयमिदमेव पुनः प्रेत्यायुर्भाग्यं मदीप्सितं बिभृयाम् ।
पूरय चषकं किमपि न जाने मम जीवितं यथा वा स्यात् ।
मम जीवनं नयेयं यथासुखं वाहमिदमपि नवेति ।

श्लो ।। पश्य प्रफुल्लं प्रहसद्वदतीवात्र चम्पकम् ।
ददामि मम सर्वस्वमन्तर्दध इति स्वयम् ।।१५।।

In Public domain. Digitization Muthulakshmi Research Academy

१५

गी ।। हासं हासं चम्पकमगदीद्धर्षाम्यहं सुवर्णमिह ।
पात्राय मम हिरण्मयवपुरपि वितरामि केवलं यामि ।

श्लो ।। ये ये भूमाववक्षिप्ता लुब्धावापि बहु प्रदाः ।
उद्धर्तव्या नैव ते ते यथा स्वर्णं पुनः पुनः ।।१६।।

गी ।। निपतेन्नहि यावद्यमदण्डस्तव शिरसि तावदेव बलात् ।
आज्ञापय तान् सद्यस्त्वमवश्यं रक्तमधु समाहर्तुम् ।।
भूयोभूयो भूमौ निक्षेप्तुं काङ्क्षया समुद्धर्तुम् ।
रे रे देवानाम्प्रिय नासि त्वं तुन्द परिमृज स्वर्णम् ।।

१६

श्लो ।। वर्धन्तां वा विनश्यन्तु मनुष्याणां मनोरथाः ।
क्षणभङ्गुरमेवायुः सैकते हिमबिन्दुवत् ।।१७।।

गी ।। जगतः समस्तवस्तुप्रचयोऽवेहि तव निम्न इति चित्त ।
सकलं चराचरमपि प्रवर्ततां त्वद्वशंवदं तदिति ।।
सर्वस्वातन्त्र्यवतः किं तेन तवैहलौकिकधनेन ।
हा हन्त क्षणभङ्गुरमेव भवेः सैकते यथा तुहिनम् ।।

श्लो ।। दिवानिशा द्वारमध्ये देहयात्रापरो नरः ।
धनिको वा दरिद्रो वा विपणौ सार्थवाहवत् ।।१८।।

In Public domain. Digitization Muthulakshmi Research Academy

१७

गी ।। शिबिरमिव प्राचीनं जगतीवलयं प्रसिद्धमेवेदम् ।
दिनरात्रि शुक्लकृष्णोभयवर्णसमन्विताश्रमोऽप्यस्ति ।।
विवृतपटकुटी जगती त्यक्ताभूच्चक्रवर्तिशतकेन ।
विततप्रासादेऽस्मिन्विश्रान्तिमगुरपि शतमहावीराः ।।

श्लो ।। निवसन्ति क्रूरमृगाः सार्वभौमसभान्तरे ।
यः खरो निर्जितो येन नृपं शास्ति स एव तम् ।।१९।।

गी ।। चषकमिह सार्वभौमो यस्मिन् सौधे पुरा करे समधात् ।
तस्मिन् प्रासोष्टशिवा हा हन्त व्यश्रमीन्मृगेन्द्रोऽपि ।।
यस्त्रिभुवनैकवीरः कालमभान्त्सीत् यथेष्टमनवरतम् ।
पश्य विचित्रं सम्प्रति स सार्वभौमोऽन्यबन्दितेनैव ।।

१८

श्लो ।। यस्य सौधं नाकपृष्ठं दासा यस्याखिला नृपाः ।
तस्यावरोधे क्वणति क्वक्वक्वेति कुक्कुभः ।।२०।।

गी ।। ताराचुम्बितसौधः प्रणतनृपकिरीटबिम्बितास्थानम् ।
तत्र निवसन्नहरहः क्वक्वक्वेति कुक्कुभः कणति ।।

श्लो ।। सर्वशोकोपशमनम् पात्रं सम्पूरय प्रिये ।
विस्मृत्य कालकर्माणि शाश्वतानन्दमाप्नुवः ।।२१।।

In Public domain. Digitization Muthulakshmi Research Academy

१९

गी ।। आयाहि मित्र नावपि शौवस्तिकवेदना यथा न स्यात् ।
अयि गणयावस्सद्यः सम्प्राप्तं सम्मदेन सर्वस्वम् ।।
आवां यावन्नश्चः पृथ्वीतलमुज्झिहावहै तावत् ।
सप्तसहस्राब्दी प्राचीनैः सम्प्रति लभावहै साम्यम् ।।

श्लो ।। अस्माभिरनुरक्ता ये दिव्यसुन्दरविग्रहाः ।
पीत्वा पुरा यथेष्टं ते शनैस्सर्वेऽपि संस्थिताः ।।२२।।

गी ।। संमाननीय सुहृदः समानमर्यादयागमन्सर्वे ।
प्रत्येकं ते प्रसभं कालपदाधः समन्ततोऽपप्तन् ।
आपानबान्धवा ये समभूवन्नेकदायुरास्थाने ।
ते कति मधुवारा ननु भूयावामग्रतोऽप्यचिक्षीबन् ।।

२०

श्लो ।। परेषामद्य तल्पेषु यथाकामं रमामहे ।
विसृजेम वयं केभ्यः संस्थिता निजसम्पदम् ।।२३।।

गी ।। उत्तिष्ठ स्वस्थो भव मा शोचीरैहलौकिकविपत्त्यै ।
उत्प्लुत्य वोपविश्यानन्देन यथेष्टभोगमनुभुङ्क्ष्व ।
त्वं यद्यपि प्रकृत्या निष्कापट्येन जीवितुं प्रभवेः ।
इतरेषां साहाय्यं न जातु वाञ्छेरभीष्टकार्येषु ।।
शाडवल एषोऽस्माकं सम्प्रति सम्भवति रङ्गभूमिरिव ।
विद्येतायं केषामास्पदमस्मासु संस्थितेषु पुनः ।।
मम नेत्रोत्सवमूर्ते तावत्त्वं नड्वलेऽपि समुपविश ।
यावदसावावाभ्यामेकीसम्भूय भूयते भूयः ।।

In Public domain. Digitization Muthulakshmi Research Academy

२१

श्लो ।। प्रायशः कारणगुणः कार्येऽप्यस्ति स्वभावतः ।
अशोकप्रसवे भाति ललिताचरणद्युतिः ।।२४।।

गी ।। स्थलपद्मसमृद्धं प्रतिशाद्वलमतिदर्शनीयमस्त्येव ।
महतोऽपि रक्तधातुः परिणमते हीदृशेन रागेण ।।
विकसेद्यद्यदशोकं प्रतिक्षणविजृम्भमाणरागेण ।
तत्तत्सौन्दर्यश्रीकपोलतलभाग्यचिह्नमेव स्यात् ।।

श्लो ।। मञ्जुवञ्जुलकुञ्जोऽयं नदीतीरे विराजते ।
एनं मा पीपिडः कोऽस्य विद्यान्मार्दवकारणम् ।।२५।।

२२

गी ।। कथयसि नदीतटस्थं शाद्वलममराङ्गनोष्ठजातमिति ।
मातीतडः पदेनेदं समभूदेव कामिनीवपुषः ।

श्लो ।। सम्प्राप्तं कामितं भुङ्क्ष यावदायुस्समाप्यते ।
भोक्ता भोग्यं यतो जातं स्वभावाल्लीयते ततः ।।२६।।

गी ।। त्वं मासमापिपस्त्वज्जीवितशेषं वृथाशयाक्लिष्ट्वा ।
मायौक्षीस्तावकदिनचर्यामपि भाव्यसम्भवार्थेन ।।
मात्याक्षीस्त्वं पुस्तुकमेकान्तवनं प्रियाधरोष्ठमपि ।

In Public domain. Digitization Muthulakshmi Research Academy

२३

त्वां पितृवेश्मनि तावत्समवर्ती यावदेव शाययति ।।
तस्मात्पिब मार्द्वीकं स्वप्तासि द्रागधो भुवो यस्मात् ।
असहायोऽप्यद्वन्द्वस्त्वममित्रोऽतल्प एव भवितासि ।।

श्लो ।। ऐहिकामुष्मिकपरावुभावद्य विनिन्दति ।
खवाणी किं वृथा भ्रान्तौ वेलाकुरुत इत्यपि ।।२७।।

गी ।। विविधमतकलहनिरता व्यर्थीकुर्वन्ति जीवितं केचित् ।
संहत्य विस्मयन्ते विश्वासेनापि चर्चया केचित् ।
सम्बोधकोऽप्यकस्माद् व्याहार्षीत्सरभसं समागत्य ।
रे मूढा युष्माकं नास्ति गतिरमुत्र वा परत्रेति ।

२४

श्लो ।। स्वपन्तं मां काप्यवोचत्पुष्पं प्राग्व्यकसीदिति ।
रहोऽवादीत्सैव बुद्धं दृष्टं नष्टमभूदिति ।।२८।।

गी ।। गन्धोत्तमां पिब त्वं भ्रश्येदेवाशु केतकीपुष्पम् ।
सञ्जीव यथेष्टसुखं यौवनमन्तर्दधीत सौम्य इव ।
प्रमदेन जीवितं ते समयापय सततमुपवनप्रान्ते ।
अस्मादृशमेतदपि प्रायो भूयेत नश्वरं हन्त ।

श्लो ।। सर्वे हास्यास्पदा नष्टा आस्तिकावापि नास्तिकाः ।
बद्धा एव न मुक्तास्ते पण्डिताः पामरा इव ।।२९।।

In Public domain. Digitization Muthulakshmi Research Academy

२५

गी ।। यातो योऽस्मत्पुरतोऽप्यशयिष्टाधो भुवो बुधम्मन्यः ।
यात्ययि पात्रि पिब सुरां सत्यं शृणु वा त एव तद्वचनम् ।।
मानुषसर्वस्वं ते स्वोहाण्डजमप्यजीगमन्नाकम् ।
जिज्ञासया त्वदर्थं समक्षुभन्सन्ततं वृथैवैते ।।

श्लो ।। पुराहं तत्त्वजिज्ञासुर्वेदशास्त्राण्यधीतवान् ।
गमनागमनद्वारमेकमेव न संशयः ।।३०।।

२६

गी ।। श्येनोऽभूवमगममपि सर्वस्मिन्नेवगुप्तलोकेऽस्मिन् ।
ऊर्ध्वमधः परितः पर्यैक्षीदं विश्वमखिलमेव मया ।
विश्वासपात्रमस्मत्प्रियमित्रं नात्र किमपि लोकित्वा ।
द्वाराद्यतोऽहमगमं तत एव पुनः पुनर्बत न्यवृतम् ।।

श्लो ।। स्वयं वपञ्ज्ञानबीजं ततो वृक्षमजीजनम् ।
तत्फलास्वादनेनाहं जगन्मिथ्येत्यबोधिषि ।।३१।।

२७

गी ।। शास्त्रमपि देशिकमुखा दध्यैष्महि शैशवे वयं किञ्चित् ।
स्वयमीषदन्तरङ्गे प्राह्लादिष्महि विचक्षणं मन्याः ।
पश्य विवादस्यान्ते प्राप्यास्माभिर्विचारफलमित्थम् ।
जलमिव समभूम वयं प्रागाममरुद्यथातथावश्यम् ।
सन्दिग्धनित्यतत्वस्येह रहस्यं न कोऽपि बहिरकृत ।

In Public domain. Digitization Muthulakshmi Research Academy

उल्लङ्घ्य कालचक्रं नह्यशकत्पादमेकमपि गन्तुम् ।
शिष्याद्याचार्यान्तं समदर्शमिदं यथा कथञ्चिदपि ।
मातृजनितजनतायां हन्त सदा सर्वथापि दौर्बल्यम् ।

श्लो ।। अत्र जातः कथमहं न ज्ञातं कारणं मया ।
पराधीनं क्लिष्टमपि क्षणिकं मर्त्यजीवितम् ।।३२।।

२८

गी ।। तापत्रयेण सह मामजीजनद्विधिरसाविहैवादौ ।
निर्वेदनात्परमहं किमापिपं (?) मामकायुषि विशेषम् ।
वयमित्थं विवशा एवागामेतस्ततोऽपि निर्विण्णाः ।
अस्मद्गमनागमनस्थितिकारणमीषदपि न जानीमः ।
अन्तर्जलमिव नद्या मन्दसमीरो यथा महाटव्याः ।
हन्त मम जीवितस्याप्यभूद्गतं विफलमेव दिनमपरम् ।

श्लो ।। कथं हठादिहानीताः क्षेपणीया वयं कुतः ।
ईदृग्विचारोपशान्तिर्भवेत्किं मधुना विना ।।३३।।

२९

गी ।। सृष्टिप्रारम्भदिनेऽजनि सुतरामस्वतन्त्र एवाहम् ।
दिष्ट्या निर्णीतमभूदायुर्भाग्यमपि मामकीनमतः ।
निबिडं बधान काञ्च्यावलग्न मयि धीमति प्रिये पात्रि ।
सन्नद्धा भव यदहं मधुना संक्षालयामि दुःखमलम् ।
यद्यस्मदागमः स्यान्मम निघ्नो मे स्थितिर्भवेन्नैवम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अभविष्यदधीनं चेन्मद्गमनं नापि किमहमगमिष्यम् ।
श्रेयानबोभविष्यल्लोकेऽस्मिंस्ताद्दशाद्भत विशेषात् ।
नह्यगमिष्यं नापि प्रायास्यं यदि हि नाजिजीविष्यम् ।

श्लो ।। सप्तमद्वारतो मध्यलोकस्याहं समुद्गतः ।
बन्धनं मन्दपर्यन्तं विना विधिमलीलवम् ।।३४।।

३०

गी ।। पातालाच्छनिमण्डलपर्यन्तमलीलवं निखिलबन्धान् ।
दुस्साध्यानप्यचिरादहं मुहुः केवलं विना दैवम् ।।

श्लो ।। कपाटं निबिडं बद्धं कुञ्चिका न हि विद्यते ।
सत्यमन्तर्हितं ज्ञानमपि क्षणिकमीदृशम् ।।३५।।

गी ।। जानीवहे न जातु त्वमप्यहं नित्यविधिरहस्यानि ।
नह्यशकावसमस्यां कठिनामेतां त्वमप्यहं पठितुम् ।
आवां प्रति काण्डपटान्तरमेवैषा प्रवर्तते चर्चा ।
विगलत्यधो यदायं नहि त्वमसि जातु नाहमप्यस्मि ।

३१

कस्यापि नास्ति पन्थाः प्रतिसीरान्तर्हितार्थमवगन्तुम् ।
आत्मस्वरूपमेतन्न समूहयितुं प्रशक्यते कोऽपि ।
केनापि तिरस्करिणी प्रच्छन्नदविष्ठवस्तुनाज्ञायि ।
नहि कोऽपि शक्यते खलु शासितुमीषदपि दैवकृत्यमिह ।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो ।। सृष्टिस्थितिविनाशानां जगतः कारणात्मनः ।
ज्ञाताविज्ञापको वापि नास्त्येव शशशृङ्गवत् ।।३६।।

गी ।। कृत्वाधः पदमखिलं प्राशिषुरखिलावनीतलं केचित् ।
इहपरलोकावपि सङ्गवेषयन्तोऽप्यमीमपन् केचित् ।
अस्य चराचरसृष्टेः कारणविज्ञानवान् पुमान् कोऽपि ।
न भवति न भविष्यति नाभूदेवेति प्रमीमहेऽद्य वयम् ।

३२

गी ।। दृष्ट्वाब्धिं तत्त्वजिज्ञासुरवोचत्कोऽपि वारिधे ।
कुतस्त्वं नीलनीलोऽसि किमहो बहु रोदिषि ।
तप्यसे किं नात्रवह्निः प्रत्यवादीत्पयोनिधिः ।
सुहृद्वियोगाद्दुःख्यामि किमशक्तः करोम्यहम् ।
नार्हामि तत्पदं गन्तुं न पुनस्तमवेक्षितुम् ।
न विहर्तुं तेन साकमतो नीलो धुनोम्यहम् ।

श्लो ।। अपि त्वामन्तरात्मानं वेत्तुं किं तप्यते मया ।
विभ्रान्तोऽहं न जाने न ज्ञाता ज्ञेयो भवेदिति ।।३७।।

३३

गी ।। त्वां मम विपुलगभीरप्रमाणधीरपि न शक्यते मातुम् ।
अस्मदखण्डध्यानसमाधिदशायां तथैव न त्वमसि ।
अहमिह यथार्थतस्तव निजस्वरूपं न हीषदपि जाने ।
त्वां न विना धीमानपि जानीते तावकीनमाहात्म्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

श्लो ।। अतोऽहं पातुकामोऽस्मि पानपात्राधरं मुहुः ।
यतः पुनर्न जागर्ति दीर्घनिद्रावशीकृतः ।।३८।।

गी ।। अधरेणाजिग्रहमहमोष्ठं पात्रस्य तृष्णयात्यन्तम् ।
तस्मात्समजगवेषं सम्यङ्मामकचिरायुषश्शेषम् ।।

३४

चषकोऽवादीदास्ये नाधरमप्यस्मदीयमाचुम्ब्य ।
गन्धोत्तमां पिबैवं भूयस्त्वं नागमिष्यसीहेति ।
गन्धोत्तमां पिब त्वं मुहुस्त्वयावोचमहमितः पूर्वम् ।
इह न पुनरागमिष्यसि यदि यातो यात एव सपदि भवेः ।

श्लो ।। पानपात्राधरोऽबोभूत्पुरा मन्येऽतिकामुकः ।
मधुपायी प्रियालापः सदा चुम्बनलोलुपः ।।३९।।

गी ।। प्रायो मादृश एवेहाभून्मदनातुरोऽप्ययं चषकः ।
सुन्दरवदनमसावप्यन्वैषिषिषीद्दिवानिशं कामी ।
सैष त्वया समालोक्यस्यग्रीवानिबद्धसङ्ग्राहः ।
हन्ताभूत्प्रायोऽपि प्रियप्रियागलविलग्नकर एव ।

३५

श्लो ।। स्मरामि कुम्भकारस्य घटनिर्माणचातुरीम् ।
शनैश्शनैर्मां स्पृशेति तं प्रार्तथत भाजनम् ।।४०।।

गी ।। पूर्वेद्युरहं विपणिप्रान्ते कमपि घटकारमद्राक्षम् ।
मृत्स्नां कृत्वाधःपदमार्द्रामत्यन्तमभ्यमर्दीत्सः ।

In Public domain. Digitization Muthulakshmi Research Academy

सा मृत्तिकाप्यवादीत्तं परिभाषापदं प्रयुज्यैवम् ।
त्वादृगबोभूवं प्रागेवाहं त्वं प्रसीद मय्यस्मात् ।

श्लो ।। कवलं पार्थिवं मर्त्यशरीरं विधिकल्पितम् ।
इति प्राचीनगाथा सम्प्रवृत्ता सार्वलौकिकी ।।४१।।

३६

गी ।। अधिकृत्य शिल्पशालामसात्समहमत्र कुम्भकारस्य ।
चक्रच्छायास्थास्नुं कुलालमुख्यमपि सम्यगद्राक्षम् ।
सकलशकरकानामपि मस्तकहस्तं यथाक्रममकार्षीत् ।
भूपालकपालेभ्यः सारं गृह्णन्दरिद्रचरणेभ्यः ।
अहमपि समयाकार्षम्मुहुर्मुहुः कुम्भकारसामीप्यम् ।
सोऽदीदृशत्स्वकीयं चातुर्यं मृत्तिकाविरचनायाम् ।
अहमेवादर्शं किन्त्वन्येऽज्ञाः केऽपि तत्र नैक्षिषत ।
नूनं मत्पितृभस्म प्रत्यक्षं कुम्भकारहस्तगतम् ।

श्लो ।। प्रमादतोऽप्यधःक्षिप्ताश्चषकान्मधुबिन्दवः ।
प्रत्येकशः प्रतीक्ष्यन्ते तृषितैश्चिरसंस्थितैः ।।४२।।

३७

गी ।। प्रायो यो योऽधस्तान्मुहुरपि बिन्दुः प्रमादतोऽक्षेपि ।
स स कामाग्निसमुज्ज्वलदक्षणः सुतरामशीशमद्दुःखम् ।

श्लो ।। समग्रं फलिता द्राक्षा पानपात्री कृतं जगत् ।
निपीय मधु सर्वस्वं त्वया सुख्यामि कामिनि ।।४३।।

In Public domain. Digitization Muthulakshmi Research Academy

गी ।। कोकनदमिवाब्दादौ कुरुष्व तव पानपात्रमूर्ध्वमुखम् ।
सम्पूर्णचन्द्रवदना यद्याश्लिष्टा भवेत्त्वया रहसि ।
अमितोल्लासेन त्वं सम्प्रति वरुणात्मजां पिबावश्यम् ।
अतिजीर्णकालचक्रं यस्मात्त्वां पातयेदधोऽकस्मात् ।

३८

श्लो ।। परस्परं परिष्वज्य मधुमत्तौ निरन्तरम् ।
जीवन्तावेव कैवल्यानन्दं विन्देव सुन्दरि ।।४४।।

गी ।। विविधोत्सवैर्यथेष्टं संमोदस्व त्वमिह दिवारात्रम् ।
सर्वाणि शरारण्यपि यतो नशिष्यन्ति भाविकालेऽतः ।
स्वान्तं स्वभावतो मम कमलमुखी सङ्गमोत्सुकं भवति ।
मामकहस्तोऽप्यनिशं हलिप्रियापानभाजनं लगति ।
प्रत्येकमिन्द्रियेभ्यः सारं सञ्चित्य भागशो भुञ्जे ।
प्रविलीयते न यावत्कार्यं सर्वमपि कारणे तावत् ।।

३९

श्लो ।। सम्माद्यमधुना यावत्पीयते मधुराधरः ।
सार्थकं जीवितं सर्वं तावदेवावयोः प्रिये ।।४५।।

गी ।। त्वं यद्यसि मदमत्तः कामं सन्तोषय स्वमिह देहिन् ।
अरविन्दाननया सह समुपविशसि चेत्प्रमोदयात्मानम् ।
नङ्क्ष्यसि यतस्त्वमन्तेऽद्यैव स्वं शून्यमिव हि मन्यस्व ।
आस्तिक्यं नास्तिक्यं विस्मृत्यात्मानमपि सदानन्द ।
मास्मार्षीर्ह्यश्वोऽपि त्वमीषदपि भूतभाविकर्माणि ।
मा स्मर जननं मरणं सुरां पिबायुर्वृथैव मानैषीः ।

In Public domain. Digitization Muthulakshmi Research Academy

४०

श्लो ।। अन्ते ददाति यत्तेऽपि मधुपानाधिदेवता ।
तत्कैवल्यामृतं सर्वं चारुभीरूररीकुरु ।।४६।।

गी ।। ज्योतिश्चक्रे दिव्यान्तरिक्षलोकस्थितेऽति गम्भीरे ।
चषकं चकास्त्यखिलजनसामान्यास्वादनीयरसपूर्णम् ।
स्याद्यादि मधुवारस्ते जनसाम्यमुपेत्य तत्र मा रोदीः ।
पिब मद्यं हृष्टस्तद्यथाविधि पुनस्त्वयाप्यमेव भवेत् ।।

श्लो ।। न बिभीहि ततः कालादायुर्भोगविनाशकात् ।
वारंवारं पुनर्जन्म नियुङ्क्ते स जगत्प्रभुः ।।४७।।

४१

गी ।। नीलवितानीभूतं पश्य खचक्रं स्फुटं शिबिरकार ।
समतिष्ठिपत्पटकुटीमबबन्धद्द्वारमखिलचर्चायाः ।
चषकीकृतस्वरूपे हलिप्रियात्यन्त सूक्ष्मबिन्दून्व ।
आद्यन्तशून्यपात्री विदधाति सहस्रशश्शिबिरकारान् ।

श्लो ।। प्रिये त्वमप्यहं दीर्घनिद्राधीनौ भवेव चेत् ।
स्याज्जगत्यावयोर्वार्ता समुद्रक्षिप्तलोष्टवत् ।।४८।।

गी ।। जानीहि त्वमवश्यं यदा त्वदीयान्विमुञ्चसि प्राणान् ।
दैवरहस्यप्रापककाण्डपटान्तर्हिता तदा भवसि ।

In Public domain. Digitization Muthulakshmi Research Academy

४२

ईषदपि न लाभाय प्रभवति लोकस्य मामकागमनम् ।
निर्याणमपि मदीयं प्रवर्धयति न हि तदीयसौभाग्यम् ।
क्षणभङ्गुरा वयं स्मः सदा वरीवृत्यतेऽप्ययं लोकः ।
अस्माकं नाम विना ऋतेऽस्मदीयेन वापि चिह्ने न ।
सुचिरमहो नाभूम प्रागिदमीषदपि न जगदक्षैषीत् ।
वयमेव नश्वराः किन्त्वविशङ्कं स्थास्नुरेव लोकोऽयम् ।

श्लो ।। ब्रह्मप्रलयपर्यन्तं जायते क्षीयते जगत् ।
प्रेयस्यमादयित्वावां सुख्याव प्रतिजन्मनि ।।४९।।

गी ।। जीवितकालोऽपि भवत्याश्चर्यकरो वणिक्प्रचार इव ।
अत्यन्तजागरूको भवन्गृहाण क्षणं प्रमदजनकम् ।

४३

शौवस्तिकप्रियगतिं मा शोचीस्त्वं वृथाधुना पात्रि ।
मधुसम्पूर्णं चषकं मां द्राग्देहि प्रयाति रात्रिरियम् ।
सृष्टः कष्टात्मायं विधिनैवं दुःखमृण्मयाकारः ।
भुक्त्वा क्वचिन्निजोचितकर्मफलमवश्यमेव निर्याति ।

श्लो ।। वृथा रहस्यजिज्ञासुः समापयसि जीवितम् ।
सत्यासत्यगतिः सूक्ष्मा स्वैरं विहर सुन्दरि ।।५०।।

गी ।। अयि पुत्र त्वं सर्वेष्वपि निष्णातासि शस्त्रगुह्येषु ।
किं क्लिश्यसे दिवानिशमनर्थकाभिर्वृथैव चिन्ताभिः ।
त्वदभिलषितमिह विहितं न भवेद्यदि सफलमेव निजकार्यम् ।
आत्मानं सन्तोषय जीवितकाले यथा कथञ्चिदपि ।

In Public domain. Digitization Muthulakshmi Research Academy

४४

श्लो ।। सूक्ष्मसूक्ष्मतमो धर्मः केनापि न हि बुध्यते ।
विद्येत चेत्सत्यवेत्ता पराधीनो भवेदसौ ।।५१।।

गी ।। नास्तिक्यादास्तिकतापर्यन्तं श्वसितमेव परिणमते ।
सन्देहादपि निश्चयदशावधिं प्राण एव सञ्चरति ।
अमुमेव जीवनदशामतिप्रिय प्रियतमां गृहाण मुदा ।
असुधारणोत्सवोऽयं मुहूर्तमात्रं हि सम्भवत्यावाम् ।
बुद्धिरुपज्ञी भवितुं ममाभिलषतीत्यवोचदेव मनः ।
शिक्षय मां तत्त्वं यद्यसि शक्तोऽपीत्यहं तदप्राक्षम् ।
आत्मापि मामवोचन्मादास्त्वमितः परं प्रतिवचांसि ।
हन्तैकज्ञानेनाप्यखिलं विज्ञातमेव भवतीति ।

४५

श्लो ।। भवबन्धा विनश्यन्ति परमार्थविदश्शनैः ।
जीवन्मुक्तः स एवैकः सदानन्दो विशिष्यते ।।५२।।

गी ।। परिणामात्मा चन्द्रः स्वभावसिद्धप्रभावसम्पन्नः ।
विविधस्थावरजङ्गमजीवोपाधीन् कदाचिदपि धत्ते ।
तस्मान्नश्यत्ययमिति जहीह्यसम्भावनीयनास्तिकताम् ।
लुप्यन्ति गुणा एवास्यासावपि केवलश्चकास्ति सदा ।
पूरय ममाञ्जलिपुटं गन्धोत्तमया यतस्तपति हृदयम् ।
जीवितमिदं द्रुतपदं पारद इव चञ्चलं मुहुर्भवति ।

In Public domain. Digitization Muthulakshmi Research Academy

४६

सन्नद्धो भव तरसा जाग्रत्सम्पद्यतः पुनः स्वपिति ।
जानीहि यौवनाग्निर्हन्त हठादेव बोभवीत्यम्भः ।

श्लो ।। सन्तुष्यत्येव तत्त्वज्ञः सदा सर्वत्र सर्वथा ।
केनापि कर्मणा नैव लिप्यते परमार्थवित् ।।५३।।

गी ।। परिपक्वकालपिहितप्रदर्शयस्याननं न केभ्योऽपि ।
जगदाकारेणैवं स्वयमेव कदाचिदाविरसि भूयः ।
स्वयमेव न किं भवसि प्रदर्शकः सर्वथेदृशमहिम्नः ।
दृग्दृश्योभयवस्तु प्रकृतिं दीपयसि केवलोऽपि त्वम् ।

४७

श्लो ।। अत्याशया दुःख्यति यः स देवानाम्प्रियाग्रणीः ।
यावज्जीवं सुख्यति यः स विचक्षणग्रामणीः ।।५४।।

गी ।। जीवितरहस्यमेतद्यथास्थितं यदि मनो विजानाति ।
वेत्त्येव दीर्घनिद्रा समधिकृतमतीव देवगुह्यमपि ।
अद्य भवन्स्ववशस्त्वं न हि यदि यत्किञ्चिदपि विजानासि ।
श्वश्चेदन्यायत्तः प्रभवसि वेत्तुं कथं किमपि तत्वम् ।

श्लो ।। मा काङ्क्षीस्त्वं भाविभोगान्वर्तमाने सुखी भव ।
न कोऽपि शक्यते ज्ञातुं किं भवेदुत्तरोत्तरम् ।।५५।।

In Public domain. Digitization Muthulakshmi Research Academy

४८

गी ।। ऐहिकविषयासक्तिं सङ्कुच्यातीव जीवसन्तुष्टः ।
सुकृतं वा दुष्कृतमपि बन्धनमखिलं लुनीहि निश्शेषम् ।
हालां हस्ते कृत्य प्रियाङ्गनाचूर्णकुन्तलान्धेहि ।
गच्छति यतोऽखिलं द्राक्तिष्ठन्ति न परिमितान्यपि दिनानि ।
सुचिरविलम्बितभाविश्रीभोगेच्छामतीव खलु कृत्वा ।
आयतचिकुरयुवत्या क्रीडामपि सह वल्लकीश्रुत्या ।
श्रेयानेवाद्याखिलविद्याध्ययनप्रयत्नसङ्कोचः ।
श्रेष्ठैवातिमनोहरकान्तालकजाललोलकरकेलिः ।

श्लो ।। चिन्त्यते किं सुधास्वर्गनरकौ भ्रान्तिकल्पितौ ।
यथेष्टं भोक्तव्यमेव त्वयाप्तं साम्प्रतं सुखम् ।।५६।।

४९

गी ।। तत्वविजिज्ञासाया ये ये दासा विवेचका ये ये ।
ते सदास्ति नास्तीत्यनीनशंश्चर्चयैव निजमायुः ।
देवानांप्रियमौले द्राग्गच्छेतस्ततो वरय माध्वीम् ।
सन्ति यथाजाता अप्यपक्वमार्द्रीकवद्यतो विरसाः ।
कोऽवधिरनाद्यनन्तविशेषात्मकभूतभाविचरितस्य ।
उत्सवसमयः सम्प्रति नास्त्येव प्रतिनिधिः प्रसन्नायाः ।
ज्ञानक्रियापटुत्वं मम निश्शेषं विनष्टमेवाभूत् ।
किन्तु सुरैव शमयति प्रतिबन्धानप्यतीव दुःसाध्यान् ।

श्लो ।। शुष्कवेदान्तमीमांसा वृद्धभार्यामतित्यजम् ।
हालाकन्यामुद्व्यवाक्षं जगन्मित्रमबीभवम् ।।५७।।

In Public domain. Digitization Muthulakshmi Research Academy

५०

गी ।। वाञ्छेयमेकभारप्रमाणमद्य प्रपूर्णचषकमहम् ।
इन्द्रीयियिषामि पुनः स्वयं द्विसाहस्रपलपरिस्रुतया ।
मेधाश्रद्धोत्सर्जनशपथं कुर्वै त्रिवारमेवादौ ।
वरुणात्मजां यथाविधि पाणौकृत्य चिरमहमपि रिरंसे ।

श्लो ।। सप्रमाणं जगद्धेतुरस्तु मास्तूर्ध्वतोऽप्यधः ।
अत्यन्तमदमत्तस्य वृथा तर्केण किम्मम ।।५८।।

गी ।। जानेऽहमस्तिताया अपि नास्ति त्वस्य वा बहिस्तत्वम् ।
जानाम्यूर्ध्वाधःस्थितिरहस्यमखिलं पुनः प्रपञ्चस्य ।
आत्मस्तव प्रियोऽहं जिह्रीयां मामकेदृशं ज्ञानात् ।
यद्यधिकं जानीयां परिस्रुता मत्ततां विना तत्त्वम् ।

५१

श्लो । अयं स्वतन्त्रसिद्धान्तः कथमाक्षिप्यते जनैः ।
श्वोऽजातस्य परासोर्ह्यः सुखमद्यैव देहिनः ।।५९।।

गी ।। भ्रान्त्यावेदान्त्यहमित्यजागदिष्टास्मदीय परिपन्थी ।
जानाति देव एवास्मि वा न वा तादृशो यथा कथितः ।
दुःखात्मकनीडेऽस्मिन्यथा तथा वा समागतोऽस्मीत्थम् ।
चरमदशाकष्टतरैवास्ति मदीया यतो न मां जाने ।
दिनयोर्द्वयोर्न कर्षति दुःख स्मृतिरीषदपि मदीयमनः ।
एकत्राप्यन्येद्युः पूर्वेद्युर्वोभयेद्युरितरत्र ।।

In Public domain. Digitization Muthulakshmi Research Academy

५२

श्लो ।। पानद्वारादिव्यमूर्तिर्भुजन्यस्तघटागता ।
विवृतास्याज्ञया तस्याः पीतं यत्तन्मधूयते ।।६०।।

गी ।। पूर्वेद्युर्मदमत्तोऽ बोभूयिषि पानगोष्ठिकाप्रान्ते ।
दोर्भृतहालाभाण्डं मत्तमदर्शमतिवृद्धमपि तत्र ।
किं लज्जसे न दैवादयि वृद्धेत्यहमजागादिषितमपि ।
सोऽवीवदद्दयामय ईशः पिब मध्वभीष्टमेहीति ।

श्लो ।। एकीकुर्वीत मधु यद्यन्योऽन्यविमतान्गुरून् ।
तेनामृतो भवेन्मर्त्योऽयोभर्ममणिना यथा ।।६१।।

५३

गी ।। वरुणात्मजां पिब ततः प्रभूतनानापदः पलायेरन् ।
सुतरामपि द्विसप्ततिविभिन्नमतसंशयाः प्रणश्येयुः ।
मा त्वं त्याक्षीर्जात्वप्यमृतकरं धातुवादिनं मित्र ।
लेशमपि तेन दत्तं भुङ्क्ष्व स विपदः सहस्रशो हन्ति ।

श्लो ।। भुञ्जानोऽप्यखिलान्भोगान्विदेहः पुरुषोत्तमः ।
जगद्गुरुः पुराराजीज्जीवन्मुक्तः परन्तपः ।।६२।।

गी ।। जयतु परमेश्वरस्त्वं हाला तत्त्वं यथार्थतो वेत्सि ।
मानसपीडाश्शतशो विनाशयति कृष्णगोस्तनीमदिरा ।

In Public domain. Digitization Muthulakshmi Research Academy

५४

कृपया भुवनविधातुर्दयामयस्यापि देवदेवस्य ।
निर्विण्णो नाभूवं नाप्यपराधी ह्यतीव नो पापी ।
अद्याहं मदमत्तं स्यां यदि निद्रालुरपि विनष्टायुः ।
सर्वेश्वरः कृपालुश्श्वः कुर्यान्मामकास्थिसञ्चयनम् ।

श्लो ॥ पानपात्राधरमधु भोग्यमेव जनैः सदा ।
निन्द्याश्चेत्प्रमदालोलाः पापाः किं दैवचोदिताः ॥६३॥

गी ॥ सेवे हालामेतामर्हत्यस्माद्दशोऽखिलोऽपि जनः ।
मम मधुपानव्यसनं दैवेनोपेक्षणीयमेव भवेत् ।
मन्मधुपानप्रकृतिं सृष्ट्वादावेव दैवमवगच्छेत् ।
यदि न पिबेयं मद्यं सर्वज्ञत्वं विधेरपि मृषैव ।

५५

श्लो ॥ त्यजेयमद्य किं सौख्यं पश्चात्तापकलङ्कितः ।
पिबेयं मूढविश्वासकल्पितं मधुसंस्थितः ॥६४॥

गी ॥ निपतेरप्यध्यग्नि प्रसभं नरके विचारणीयदिने ।
मा पिब मद्यं मध्ये विपदं निवसेस्त्वमिति वदन्त्येते ।
अस्त्वेवमुभयजगतोरन्तः सारोऽपि यदि विचार्येत ।
सस्यान्मुहूर्त एव त्वं मधुमत्तो भवेर्यदा नूनम् ।
त्वमिहैव स्वर्गं कुरु वरुणात्मजयापि पानपात्रेण ।
सुरलोको यत्र स्यात्प्रेयास्तत्रापि वा न वा हन्त ।

In Public domain. Digitization Muthulakshmi Research Academy

५६

श्लो ।। गुरूपदिष्टं गच्छेयुर्विरक्ताश्चेद्दिवं प्रति ।
तेषामनुभवस्तत्र न शून्यादतिरिच्यते ।।६५।।

गी ।। द्राक्षासवपानमपि स्वेच्छागतकामुकीसभविहारः ।
श्रेयानेव दिवानिशमत्यन्तं जञ्जपूकसंसर्गात् ।
स्त्रीलोलुपः प्रसन्ना मत्तश्चेन्निरयभाग्भवेद्धन्त ।
रसिकः पञ्चजनो नैवेषिषिषेत्स्वर्गमुखमपि द्रष्टुम् ।।

५७

नितरां मत्तः पुरुषो घोरे नरके पतेदिति वदन्ति ।
तद्वचनं प्रतिबन्धकमेवैतन्मानसं नाविश्वसिति ।
मदमत्तः स्त्रीलोलः स्याद्यद्यपि घोरनरकपुरवासी ।
पश्यावश्यं स्वर्गो भवेत्परेद्युरतिशून्यमुष्टिरिव ।

श्लो ।। मिथ्यैव स्वर्गनरकौ सत्यमायुर्विनश्यति ।
अनर्थकं प्रेतकर्म जातस्य मरणं ध्रुवम् ।।६६।।

गी ।। त्वमहो बत माभाणीः केभ्योऽपि रहस्यमेतदति गूढम् ।
न विकसति स्थलपद्मं शुष्कीभूतं पुनः कदाचिदपि ।
यष्टिमधुनार्द्रलोष्टैः कति कालं विरचयेयमम्बुनिधौ ।
अहमपि जाग्लेयेयाग्निपूजकैर्देवतालयैर्हन्त ।

In Public domain. Digitization Muthulakshmi Research Academy

५८

कोऽजागदिष्टनरके बोभूयेयाहमपि चिरेणेति ।
कोऽजङ्गमिष्टनिरयं स्वर्गादिह कोऽनुभूय आयासीत् ।

श्लो ।। यातः स्वानुभवं वक्तुं न कोऽपि पुनरागतः ।
छान्दसैरथवा भ्रान्तैः परलोकः प्रकल्पितः ।।६७।।

गी ।। क्ष्मावलये बहुगहने समचञ्चूर्यिष्यहं दिवारात्रम् ।
अखिलार्थविजिज्ञासुस्ततोऽप्यबोभूयिषि स्वयं पथिकः ।
नाश्रौषं पन्थानं कस्मादपि यः स कुत इहायासीत् ।
अगमद्यतोऽध्वनीन स्तत एव पुनः स्वयं न्यवर्तिष्ट ।

५९

एतस्मिन्विपुलाध्वनि सङ्गीभूय प्रयान्ति ये पथिकाः ।
पुनरायातस्तेषु न मां कोऽपि रहस्यवृत्तमजिगदिषीत् ।
जागृहितरां त्वमेतच्चतुष्पथान्तस्थितालये किमपि ।
नाहासीर्वस्तु पुनः समेत्य यद्भोक्तुमज्ञसैवैषीः ।

श्लो ।। अध्यापकाश्श्रद्धधाना भ्रान्ता मीमांसका अपि ।
अरण्यरोदनं कृत्वा दीर्घनिद्रावशीकृताः ।।६८।।

In Public domain. Digitization Muthulakshmi Research Academy

६०

गी ।। प्राभूवन्सन्तस्ते समस्तविद्याप्रभावकूपाराः ।
संपूर्णगुणनिकायाः सदस्यदीपाः पुरापि समवात्सुः ।
अस्मिन्कुहूनिशीथे ते हन्त न राजपथमकार्षुरिह ।
केवलमचिख्यपन्निति हासान्सर्वेऽप्यगुर्महानिद्राम् ।।

श्लो ।। स्वर्गः सिध्येदात्मनश्चेत्पौरुषेणैव कर्मणा ।
स्पृहणीयं न कस्यापि जीवनं दुःखभाजनम् ।।६९।।

गी ।। त्वं हे मानसवपुषः पङ्कं प्रक्षालयेः समन्ताच्चेत् ।
सुखवर्त्मनि यद्यपि सम्बोभूयेथास्तमां स्वयं नग्नः ।
स्वर्गपुरिभवेद्यदि तव सदनमहो त्वं किमिह न जिह्रीयाः ।
आगच्छेः किं मृण्मयलोकनिवासी कथं भवेर्हन्त ।

६१

श्लो ।। मन्ये देहो भवेत्कश्चित्पटमण्डप इत्यहम् ।
क्षणं विश्रम्य तत्रात्मा गन्तव्यः प्रसभं ततः ।।७०।।

गी ।। पटवास इव वपुस्तव हन्त वरीवृत्यते तथाहि ननु ।
राजेव प्राणस्ते नश्वरलोकोऽपि तावकगृहमिव ।
नूतनगृहनिर्माता वितानरचनापटुर्नियतकालः ।
नाशयति शिबिरमेतत्तावद्यावत्प्रयात्ययं राजा ।

श्लो ।। ज्ञातुं पुनर्जन्मतत्त्वं प्रेषितं मायया मनः ।
आत्मैव स्वर्गनरकाविति तन्मामबूबुधत् ।।७१।।

In Public domain. Digitization Muthulakshmi Research Academy

६२

गी ।। सृष्ट्याद्य ह्येवास्मन्मानसमाकाशवीथिमडयिष्ट ।
पत्रं कलमं त्रिदिवं नरकमजगवेषदत्र सकलमपि ।
किन्तु समवावदिष्टास्मद्गुरुरपि तत्वतः सुपन्थानम् ।
पत्रं कलमस्त्रिदिवो नरकः सकलमपि तत्त्वमेवेति ।

श्लो ।। अविद्ययात्मा बद्धश्चेद्विद्यया मुच्यते पुनः ।
ब्रह्मसत्यं जगन्मिथ्या किं वृथा तप्यते मया ।।७२।।

गी ।। कटिसूत्रमेव मामकशुष्काङ्गभ्रष्टमस्ति दिवचक्रम् ।
मम विपुलबाष्पपूरप्रचार एवापि भवति दिव्यसरित् ।

६३

बोभूयतेऽपि नरकः स्फुलिङ्ग एव मम मोघशोकस्य ।
तृटिरेव स्वर्गोऽस्त्यस्मदीयसन्तोषमूलकालस्य ।
श्रद्धापि दैवभक्तिस्तव मुख्याचरणयोग्यधर्मोऽस्ति ।
स्वर्गोऽपि दुर्गतिस्त्वद्रागद्वेषप्रतिकृतिरथ भवति ।।

श्लो ।। जगत्काण्डपटे सूर्यदीपेनास्मान्महानटः ।
प्रयुज्याप्युपसंहृत्य यथेष्टं क्रीडति प्रभुः ।।७३।।

गी ।। एतत्खचक्रमस्मिन्हन्त भवामो वयन्तु विभ्रान्ताः ।
जानीमो नूनमिदं मायामयकाचदीपयन्त्रनिभम् ।
दीपस्तम्भः सूर्यः समस्तभुवनमपि भवति दीपगृहम् ।
नानामूर्तिविशेषा इव स्म इह सर्वतः परिभ्रान्ताः ।।

In Public domain. Digitization Muthulakshmi Research Academy

६४

श्लो ।। चतुरङ्गफले खेलन्नहोरात्रभिवर्णिते ।
प्रवर्तयन्नपि बलं निवर्तयति स प्रभुः ।।७४।।

गी ।। प्रतिपाद्यते स्वभावः किन्त्वत्र न हीषदस्त्यतिशयोक्तिः
अक्षा वयं भवामः सभिको बोभूयते पुनर्दैवम् ।
अष्टापदीकृतभवे परिणायवशंवदाश्शिशुद्यूते ।
नीयामहेऽवसानेऽन्तः पेटीं द्राक्परस्परश्लिष्टाः ।।

श्लो ।। क्रीडाद्यूतः क्षिपेद्यत्र पतेत्तत्रैव कन्दुकः ।
यथा नियुञ्ज्यान्नो दैवं वर्तेमहि तथा वयम् ।।७५।।

६५

गी ।। हे जङ्गमकन्दुक इव करपालिकया विधेस्त्वमाक्षिप्तः ।
सव्यमथवापसव्यं दाधाव्यस्वेह किमपि मावादीः ।
यः कोऽप्यबिभ्रमत्त्वामितस्ततस्स्वेच्छयैवमत्यन्तम् ।
जानाति स जानाति स जानाति स एव सैव जानाति ।

श्लो ।। विधातृलिखितं कोऽपि परिमार्ष्टुं न शक्यते ।
येनकेनाप्युपायेन भक्त्या वा तपसाथवा ।।७६।।

गी ।। दैवमलेखीदादौ ललाटफलकेषु भावि कर्मफलम् ।
गुणदोष समालेखि न्यस्य वरीवृत्यतेऽप्यविश्रान्ता ।
प्रथमदिन एव सृष्टेर्निरणेनीयिष्ट भाव्यवश्यफलम् ।
अस्मात्पौरुषमखिलं चिन्तास्माकं वृथैव बोभूतः ।

In Public domain. Digitization Muthulakshmi Research Academy

६६

श्लो ।। ईदङ्कृतं पण्डितोऽपि मण्डयेदुत खण्डयेत् ।
अलङ्घ्यं नित्यमच्छेद्यममोच्यं दैवबन्धनम् ।।७७।।

गी ।। जीवनमायुर्नोऽधिकमपि हीनं नैव शक्यते कर्तुम् ।
न्यूनमतिवेलमथवोभयत्र सर्वत्र हि खलु दुःखित्वा ।
त्वमहमपि त्रिकरणतश्चेदेकीभूय समभविष्याव ।
सिक्थकमिव हस्ताभ्यां विधिं यथेष्टं व्यरूपयिष्याव ।

श्लो ।। अधोमुखं लुठद्व्योमकपालमतिसङ्कटम् ।
नुमः किं दोधूयमाना अस्माद्दगवशं हि तत् ।।७८।।

६७

गी ।। भाजनमधोमुखीनं यथाखचक्रं निपतितमेवास्ति ।
सर्वेऽवाचीना अप्यवशास्तस्मिन् भवन्त्यवक्षिप्ताः ।
सुगुणोऽथवापि दोषः स्वभावतो बोभवीति मनुजस्य ।
आमोदो वा खेदः प्रागेव विधीयतेऽत्र दैवेन ।
मा व्यश्वसीर्वृथैव ज्योतिश्चक्रमिह कार्यमूलमिति ।
बहुशस्तद्भवतोऽपि क्षुभ्नाति गतिं निजां सदाज्ञात्वा ।

श्लो ।। उत्पत्तिस्थितिनाशानामेकमेव हि कारणम् ।
स्वरूपतो न भेदोऽस्ति लोकस्याद्यन्तयोरपि ।।७९।।

In Public domain. Digitization Muthulakshmi Research Academy

६८

गी ।। अयि हृदय विश्वमेतन्मिथ्यैव यथार्थतोऽस्ति यद्धेतोः ।
किं तेन कारणेनात्यन्तं दोधूयसे वृथा व्यसनैः ।
दैवाधीनां कुरु तनुमपि बोभूयस्व कालमनुसृत्य ।
कलमोऽतीतश्चेत्त्वां प्रत्येष पुनः कदापि नायाति ।

श्लो ।। भूतकालः परोक्षोऽस्ति भाविकार्यमनिश्चितम् ।
वृथागतानागतयोश्चर्चा पिब पिबापिब ।।८०।।

गी ।। सन्तुष्टो बोभूहि ह्यस्तनविभवास्ततोऽप्यपंफुलिषुः ।
सकलमबोभूदिष्टं तवाप्रतिहतं परेद्युरेव यतः ।

६९

जेजीह्यानन्देन ह्यो गततृष्णस्त्वमप्यबोभूवीः ।
उभयेद्युरपि परेद्युः पूर्वेद्युस्तव गतिं ह्यदादिषुः ।
बोभूतात्प्रमदेन त्वमिहावाजङ्गमीः क्व समबोभोः ।
दाधेयाहालामीषदपि न जानास्यहो क्व जङ्गम्याः ।

श्लो ।। सृष्ट्यादावेव निहितं विधेयं सर्वदेहिनाम् ।
अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।।८१।।

गी ।। यस्मिन् ग्रहा अकार्षुः सन्नद्धानहनि दुर्विनीतांस्ते ।
अश्विन्यां गुरुचारस्फुटपद्धतिमप्यदीदिशन्नेव ।
मज्ञातकफलमेवं ज्योतिश्शास्त्राद्यथैव निरणायि ।
हन्त मम कोऽपराधः सम्प्रति मे भागधेयमिदमस्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

७०

श्लो ।। दृढं यद्यवलम्बेयं सूत्रं मधु विनिर्मितम् ।
तत्कैवल्यं समाप्नोमि यदसाध्यं मुनेरपि ।।८२।।

गी ।। नित्यप्रकृतिरबोभूदस्राक्षीदिह स तस्य हेतोर्माम् ।
आदित एव यथाविध्याजीगपत्कामशास्त्रपाठमपि ।
तत एव मम हृदयनिर्भिन्नत्रसरेणुनापि स विधाता ।
प्रज्ञाकोशकवाटविभेदनपटुकुञ्चिकामिहाररचत् ।

श्लो ।। रागद्वेषौ समुद्दीप्य तेजः किमपि मां क्षयेत् ।
पानोदितप्रभालेशः श्रेयोऽस्ताध्वरभानुतः ।।८३।।

७१

गी ।। अजिगदिषिष्यं त्वां प्रति यदि साक्षान्मन्त्रमपि मदस्थाने ।
तस्मात्त्वया विनैवाचिकत्थिषिष्ये यथाविधि नमस्याम् ।
अयि देव बोभवीषि त्वमेव सृष्ट्यन्तकारणं जगतः ।
प्रबुभूषेः सन्तनितुं मम दुःखं वाथवासुखं हन्त ।

श्लो । असम्बद्धश्चेतनोऽयं जडप्रकृतितोऽसतः ।
स्वतन्त्रस्य तथाप्यस्य वृथाकर्म विधीयते ।।८४।।

गी ।। विधिरात्मना यथा मम मृण्मयदेहं यथेप्सितमकार्षीत् ।
मच्चेतः परिणामं निस्सन्देहं यथाक्रममवेदीत् ।

In Public domain. Digitization Muthulakshmi Research Academy

७२

तस्याज्ञया विना नो बोभूयादस्मदीयदुष्कर्म ।
संस्थाय कथमहमतः कुम्भीपाकं तथापि जङ्गम्याम् ।
केवलमसाध्यमिन्द्रियनिग्रहणं तत्तदाज्ञया भवति ।
अस्मादेवाकस्मात्प्रवर्तते किं विधिर्निषेधोऽपि ।
हन्त वयमन्तरा स्मः प्रतिषेधं विधिमतीव बलहीनाः ।
उभयेष्वपि पञ्चजनाः कृत्याकृत्येषु सन्नियुज्यन्ते ।

श्लो ।। पूर्वाचारपिशाचोऽयं बाधतेऽनपराधिनम् ।
स्वभावसुखिनं मर्त्यं हा धिग्दुर्विधिचेष्टितम् ।।८५।।

गी ।। सर्वाण्यङ्गानि मम प्रागमिमिश्रन्मुदा समन्ताद्ये ।
मत्समुदबीभवंस्तेऽप्यहो महाद्भुतशतप्रदृश्यानि ।

७३

एतावतो महत्तर इतः परमहं न जातु बोभूयाम् ।
अस्मद्धेतोरस्मद्देहोऽप्येवं बहिर्निरस्येत ।

श्लो ।। असद्विधिस्साधुरिति दैवभीत्या यदुच्यते ।
निष्कासितः स्यां सपदि कातरेणापि पानतः ।।८६।।

गी ।। न भवति सोऽपि मनुष्यः सुतरां निन्दन्ति यं स्वकीयजनाः ।
दुष्टं शिष्टमिति पुनर्भीत्या सहसाथवा प्रशंसन्ति ।
मधुपायी शुण्डायां निजापराधेन सन्तितिप्सेच्चेत् ।
सर्वेऽपि तत्सहचरा हन्त भ्रान्तं तमिह शिशप्सेयुः ।

In Public domain. Digitization Muthulakshmi Research Academy

७४

श्लो ।। मम प्रवृत्तेर्व्याघातस्त्वया चेत्क्रियते विधे ।
साक्षात्त्वमेवापराधी मम दोषो न विद्यते ।।८७।।

गी ।। प्रतिपदमपि मार्गे मे स्थापयसीत्थं सहस्रशः पाशान् ।
मा पिपतिषीर्बिभन्त्सा नीत्येवं मां निजागदीषित्वम् ।
नास्ति चराचरमेतन्मनागपि तवानधीनमाहोस्वित् ।
आज्ञां त्वमेव कुरुषे तथाहि मम दुष्टनामविदधासि ।

श्लो ।। सृजन्मृदा मर्त्यमपि विघ्ननिघ्नं त्रिविष्टपम् ।
विधे त्वयैवं क्रियते सुखदुःखपरम्परा ।।८८।।

७५

गी ।। यावच्चुकोपिषसि चेच्चिक्षमिष स एव तावदेवं त्वम् ।
आज्ञीप्ससि यदि यावत्तावदनुजिघृक्षसि प्रभो चित्रम् ।
अभविष्यच्चेद्दुष्टाचारो मेऽभेष्यमहमतीव विधे ।
बोभूयेत विषमपि त्वखिलं न ह्यमृतमेव बोभूयात् ।
दासोऽस्म्यहमति पापी तव कुत्रचिदस्ति सहजकारुण्यम् ।
मलिनात्माबोभूवं क्व विद्यते प्रस्फुटप्रभावस्ते ।
स्वर्गं मह्यं त्वं यदि दित्सेस्त्वच्चरणसक्तभक्ताय ।
तद्बोभूयात्प्रतिफलमेव क्वानुग्रहप्रदानं ते ।
अयि निश्शेषमनुष्यान्तरङ्गिकरहस्यसारविज्ञातः ।
आत्मीयाखिलभक्तापत्समयमहाभयप्रदानकर ।
हे देव देहि पश्चात्तापं पापं क्षमस्व मेऽत्यन्तम् ।
अय्यनुतापविधायक यतस्त्वमेवासि दुष्कृतक्षन्ता ।
प्रेतं जीवितमपि मां त्वमेव रक्षसि सदा यथान्यायम् ।
अस्य जगच्चक्रस्यास्थिररूपस्य त्वमेव भर्तासि ।

In Public domain. Digitization Muthulakshmi Research Academy

७६

अहमस्म्यत्यपराधी तथाहि दासस्य मम विभुर्भवसि ।
कस्यापि नास्ति पापं यस्माद्धेतोस्त्वमेव कर्तासि ।

श्लो ।। उपवासव्रते भग्ने क्षीणे कर्मण्यहं पुनः ।
कुंभकारालयेऽप्यस्थां मृद्विकारैः परीवृतः ।।८९।।

गी ।। हन्ताकस्मादैषम आयासीदौपवस्तमासोऽयम् ।
सङ्कटकालः सम्प्रति समभूदत्यन्तचतुरपदबन्धः ।
अयि दुर्भरव्रतविधे सर्वानपि कुरु जनांस्त्वमौदरिकान् ।
बोधय समस्तविभवैरवश्यभोगार्ह एष मास इति ।

७७

श्लो ।। रसनानां पुरारब्धचेष्टानां जल्पितं पुनः ।
मर्त्यौघमन्तरेणापि मयाश्रावि शनैश्शनैः ।।९०।।

गी ।। केचिद्वदन्ति मां पुनरायास्यत्यौपवस्त मासेन्दुः ।
तदनन्तरमपि चित्तं भूयो मद्यं न पातुकामं स्यात् ।
उपवासमासपूर्वं तावन्मात्रं सुरां पिपासेयम् ।
यावद्बोभूयां मदमत्तः सकलौपवस्त समयेऽपि ।

श्लो ।। एकोऽभाणीद्वृथा यो मां नास्राक्षीन्मृत्स्वरूपिणम् ।
विलाययेदात्मनिद्रा वस एवेमां तनूमिति ।।९१।।

In Public domain. Digitization Muthulakshmi Research Academy

७८

गी ।। आचुम्बितफालमपीह विद्यते हृद्यमद्य पात्राद्यम् ।
स विनिर्मित्सति चक्री तदेव दिदरीषति स्थले भूयः ।

श्लो ।। अन्योऽगादीदर्भकोऽपि न भञ्ज्यादात्मभाजनम् ।।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ।।९२।।

गी ।। सङ्गीकृतानि तानीह चक्रिणा पानभाजनाङ्गानि ।
दीदांस्येरंश्चेत्सोऽपीर्ष्यिषिषेदेव वारुणीमत्तः ।
कति शीर्षाण्यङ्गीनपि चक्री रम्यैरचीकरत्स्वनखैः ।
प्रेम्णैव हन्त स पुनर्द्वेषेणैवं स्वयं व्यदिदरीषीत् ।

७९

श्लो ।। अकस्मात्कुम्भकारोऽपि भिन्द्याच्चेत्स्वकृतं घटम् ।
कम्पेत किं तस्य पाणिरित्यवोचत्परो हसन् ।।९३।।

गी ।। ननु मामकागमादिह न कोऽपि बोभूयते विधेर्लाभः ।
मम निष्क्रमादितो बत तन्महि मोरूकृतो न बोभूयात् ।
कस्मादपि कर्णौ मे शोश्रूयेते न तत्वतः किञ्चित् ।
हन्त ममागमनिर्गमकार्ये एते कथं प्रवर्तेते ।

श्लो ।। जिज्ञास्यते देहयात्रा वृथा किमपि जीवितम् ।
घटः कः कुम्भकारः क इत्यवादीत्तदेतरः ।।९४।।

In Public domain. Digitization Muthulakshmi Research Academy

८०

गी ।। पूर्वेद्युर्नक्तमहं कुलालशालामजीगमं सहसा ।
मूकानपि वागीशान् द्विसहस्रमिताञ्जनांस्तदाद्राक्षम् ।
एकमपि पानपात्रं द्रागेवं स्वयमजूघुषच्छब्दम् ।
घटनिर्माता क्व पुनः क्व क्रयिकः क्वास्ति हन्त विक्रेता ।

श्लो ।। मायी विधिर्जगत्कर्ता तेन जन्तुर्विचार्यते ।
दीयते कर्मफलमित्यन्योऽवोचज्जनश्रुतिम् ।।९५।।

गी ।। पञ्चीकुर्वन्धाता भूतान्यपि मेलयन्यदास्राक्षीत् ।
कस्माद्धेतोर्भूयस्तानि सलोपानि किमुत सोऽकार्षीत् ।
यदि मूर्तान्येतानि प्रायः सुगुणास्पदानि बोभूयः ।
भूयोऽदयःकिमवधीत्प्रसभमपि वृथैव तान्यसौ हन्त ।

८१

दृष्टा बोभूयेरन् सकला यदि मूर्तयोऽपि निस्साराः ।
दोषः क ईदृशानां सर्वासां प्रायशोऽवगम्येत ।
अन्त्यविचारणा दिवसे चर्चा सम्बोभविष्यति प्रचुरा ।
नाभूत्कदापि केवलसात्विकमूर्तेश्शुभं विना किञ्चित् ।
त्वं सम्मोदस्वतमां शिवमेव स्याद्भविष्यदायुरपि ।
त्वरितः ससुहृन्मणिरपि बोभूयिष्यत इति प्रशंसन्ति ।

श्लो ।। साधूक्तमस्मान्यः कोऽपि यद्वा तद्वा नियोजयेत् ।
अन्योऽवादीत्किंबहुना मधु पायय मामिति ।।९६।।

गी ।। मामकजीवितविटपश्शाखाद्येत युगपद्यदा मूलात् ।
परितस्तस्याङ्गान्यपि बहिर्निरस्तानि हन्त बोभूयुः ।

In Public domain. Digitization Muthulakshmi Research Academy

८२

मम पार्थिववपुषो यदि निरमेमीयिष्यतोरुगलमणिकः ।
अपि तमपोपुर्विष्यदुदबोभविष्यत्पुनस्तदेव द्राक् ।
नूनमहमन्त्यकालाधःपदमाक्षुभ्य पम्पतिष्यामि ।
नष्टोत्साहः प्रवयाश्शिथिलोऽपि जुगुप्सितः परेष्यामि ।
दर्द्दश्यध्वं भाण्डादन्यन्मम मृत्स्नयेहमाकार्ष्ट ।
तावज्जेजीवीयां यावदिदं हालया प्रपोपूर्यात् ।

श्लो ।। इत्थं सम्भाषमाणेषु तेषु यः कोऽप्यजागदीत् ।
सैष भ्रातः पश्य पश्य सुरयायातिभारिकः ।।९७।।

गी ।। उपवासव्रतमासोऽप्यसीसदत्पारणं समररम्भत् ।
माधवशृङ्गारकलाविलासकथकाग्रणीः समायासीत् ।
समयोऽयमबोभूद्यद्भुजयोः सन्धाय चर्मभाण्डानि ।
वीवधकाः पश्यैते पृष्ठं पृष्ठमिति समगदिषुरद्य ।

८३

श्लो ।। मधु प्रपाययेदन्त्ये स्नापयेन्मधुना भृशम् ।
अमुम्मधुरसामूले स्थापयेन्मधुपण्डितम् ।।९८।।

गी ।। यावदहं प्रागगमं स्नपयावश्यं मुहुर्हलिप्रियया ।
अधिकृत्याच्छसुरामाख्यापय सर्वं परेतकल्पमपि ।
प्रेतोत्थानदिने मामदिदृक्षिष्यत यदीदृशं यूयम् ।
एक्षिष्यध्वं शुण्डाप्रान्तस्थपुराणमृत्तिकाराशौ ।
समवेहि मम बलायासवपात्रं सह मया निधेहि त्वम् ।
माणिक्यमिवास्यं मे हरिनीलं सपदि हि परिणमयस्व ।
जोषं संस्नापय मां परेतमानखशिखं हलिप्रियया ।
स्वादुक्षुपप्रकाण्डैः सुदृढमपि विरचय मामकं खट्टिम् ।

In Public domain. Digitization Muthulakshmi Research Academy

८४

श्लो ॥ परस्परचिरस्नेहौ पुनरारूढयौवनौ ।
जायापती पितृवने सम्मिल्येतां सुवासितौ ॥९९॥

गी ॥ हन्त पिपक्षिष्यति पदघातैर्या विद्विधिर्मदीयशिरः ।
दीदांसिष्यति सममावयवौघं विहगपक्षतिचयमिव ।
अन्यत्यत्किमपि सुराभाण्डान्मन्मृत्स्नयेहमाकार्षीः ।
अभविष्यत्तत्पूर्णं चेदहमिह मुहुरहोन्वजीविष्यम् ।

श्लो ॥ पार्श्ववर्तिनमाकर्षेन्मम गन्धोऽपि पाशवत् ।
मधुस्त्रीरसिकाः सर्वे जायन्तां पुनरास्तिकाः ॥१००॥

८५

गी ॥ यदहमपेपीयिष्ये हालां यावत्तदीयगन्धोऽपि ।
तावदुदजङ्गमिष्यत भूमेर्यस्या अधोबुभूषामि ।
यदि कोऽप्यजङ्गमिष्यन्मम पितृगृहपरिसरे मधुपिपासुः ।
नूनमबोभूयिष्यत सुतराम्मत्तः स इह परभ्रष्टः ।

श्लो ॥ विग्रहाराधनेनाभूदभाग्योऽयमभाजनः ।
दासः परवशो हन्ताः किञ्चनः स्तुतिपाठकः ॥१०१॥

गी ॥ सन्ध्यावन्दनतोऽप्युपवासेऽटटिषीद्यदा मम प्रकृतिः ।
समबोभूयिष्टतमामेवास्मन्मोक्ष इत्यजागदिषि ।
हन्त सदाचारोऽयं भ्रष्टोऽबोभून्ममापराधे नः ।
उपवासोऽपि वृथैवादध्वंसन्नेममात्रपानेन ।

In Public domain. Digitization Muthulakshmi Research Academy

८६

श्लो ।। प्राग्यतश्शपथात्प्रायः पश्चात्तापः प्रशस्यते ।
आगते पुष्पसमयेऽनुशयोध्वस्यतेतमाम् ।।१०२।।

गी ।। निश्चिनुवेऽहमहरहो नूनं पश्चात्तपामि नक्तमिति ।
सुविचार्य महापातकमधराधरिनेममात्रपानेन ।
पुष्पसमयोऽपि सम्प्रत्यागात्स इतःपरं न शोचामि ।
पश्चात्तापायैवानुशयं सुरभावये विधे देहि ।
यदि पापमकार्षमहं वसुन्धरासम्मुखे जनार्तिकरम् ।
तव सहनकरो मामुद्धरेदिति तथापि नूनमाशंसे ।
आपद्दिने ग्रहीष्ये त्वां हस्तेनेत्यजागदिष्ठास्त्वम् ।
अत्यधिकापत्तिदशामितःपरं न हि मम प्रतीक्षस्व ।

८७

मां त्वमिह यथास्राक्षीरहं तथैवादिदेव समभूवम् ।
तव निर्हेतुककृपयौदार्येणापि सहजेन सम्पुष्टः ।
शतवत्सरपर्यन्तं करवाणि समस्तघोरपापानि ।
सम्यक्ततः परीक्षै त्वत्कारुण्यमधिकमुत मेऽघमिति ।

श्लो ।। मधुवन्नास्तिकोऽहार्षीन्मम गौरवसम्पदम् ।
आश्चर्यं पानवणिजो लाभोऽल्पोऽपि व्ययोऽधिकः ।।१०३।।

गी ।। अस्माकं लज्जामपि सद्यो वरुणात्मजाददरदेवम् ।
अहमिह हलिप्रियाया न सिसाहयिषामि किञ्चिदपि विरहम् ।
विभ्रान्तोऽबोभूवं विक्रेतारो हलिप्रियायास्ते ।
दित्सन्तोऽधिकमूल्यं किन्त्वल्पं लाभमेवमीप्सन्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

८८

श्लो ।। हन्त नश्येद्वसन्तश्रीर्भ्रंश्येन्नवनवं वयः ।
गहनान्तः परिच्छन्नं कः पश्येन्मधुगायनम् ।।१०४।।

गी ।। नवयौवनचारित्रं समबोभूवीत्तदेवमिह पूर्णम् ।
अपि हरितवसन्तर्तुर्हन्ताबोभूत्कठोरहेमन्तः ।
आनन्दनटत्पक्षी तारुण्योपाख्ययापियोऽवाचि ।
हन्त न जाने स कदायासीद्भूयः स्वयं यदा प्रागात् ।

श्लो ।। अटव्यखातस्वरूपं यदीषदपि सूचयेत् ।
किमुत्पतिष्णुर्न भवेत्पिपासुर्भूस्तृणं यथा ।।१०५।।

८९

गी ।। हरिहरिसम्बोभूयाद्विश्रान्तिस्थानमत्र मनः किमपि ।
एतस्य पथोऽन्तमुतास्माभिरुपलभेत सम्प्रति यथेष्टम् ।
दिष्ट्येतः परमवनी गर्भादपि लक्षवर्षपर्यन्तम् ।
सौख्यमिह भोक्तुकामा दूर्वेव पुनः पुनः प्रजायेय ।

श्लो ।। विरच्यमानं ज्ञातं चेल्ललाटलिखितं पुरा ।
साधूकर्तुमकर्तुं वा न प्रबुध्येत किं विधिः ।।१०६।।

गी ।। अस्य जगतो विधाता रूपं सहसान्यथैव संस्कुर्यात् ।
सम्प्रति नवीनसृष्टिं रचयन्तं तं विधिं प्रपश्येयम् ।
मम नामाप्यधुनासौ जगन्निघण्टोर्विधिर्निरस्येत ।
कस्याप्यदृष्टहेतोरुताधिकं मच्छ्रियं प्रकुर्वीत ।

In Public domain. Digitization Muthulakshmi Research Academy

९०

श्लो ।। निर्भाग्यं मानवं भ्रान्तं सृष्ट्वालं कुटिलं विधिः ।
अस्वतन्त्रं जृम्भमाणदुःखोपहतजीवितम् ।।१०७।।

गी ।। यल्लिखितं विधिना तत्कदापि नन्वत्र नान्यथा भवति ।
दुःखानुभवादितरो नास्त्येव पुनर्मनःपरीणामः ।
यद्यपि यावज्जीवं रोरुद्यारक्तमम्बुसात्कृत्य ।
नातिक्रम्यात्मीयप्रमाणमेकं हि पृषदुरू भवति ।

श्लो ।। प्रतिरुन्ध्यावचेद्दैवमहं त्वमपि वल्लभे ।
शश्वन्मिथः परीरम्भामृतं नैवं पिबेव किम् ।।१०८।।

९१

गी ।। दिवमहमखिलेश्वर इव हन्त करग्राहमग्रहीष्यं चेत् ।
अद्य किमनाशयिष्यं सुतरामप्यन्तरिक्षलोकममुम् ।
आदौ दिवमन्यन्नवमेव यथेष्टं न किमहमस्रक्ष्यम् ।
तच्चार्वभविष्यच्चेन्नानिष्यत्किं यथासुखं कोऽपि ।

श्लो ।। चलद्विष्णुपदे पश्य वर्धते बालचन्द्रमाः ।
दिदृक्षते वृथैवासावावामिह पुनः प्रिये ।।१०९।।

गी ।। न हि कोऽपि बत यतश्चस्थितिमिह निश्चेतुमीषदपि शक्येत् ।
अद्यैव स्वस्थं कुरु कामज्वरपीडितं हृदयमेतत् ।
स्वैरमिह चन्द्रिकाया मयि पेपीयस्व चन्द्रमुखि मद्यम् ।
आवां गवेषयन्नपि चन्द्रोऽयमितःपरं न हि लभेत ।

In Public domain. Digitization Muthulakshmi Research Academy

९२

श्लो ।। यावत्पितृगृहं गच्छेस्त्वं शनैः प्राणवल्लभे ।
तावदेवानुसृत्य त्वां सायुज्यपदवीमियाम् ।।११०।।

गी ।। कुण्डलकर्तृकृपाणी यथात्वमहमप्ययि प्रियेऽद्य स्वः ।
हन्त भवति नौ शीर्षद्वितयं वपुरेतदेकमेवास्ति ।
आवां सममेकत्रैव सदा वर्तावहे यथापरिधौ ।
शीर्षे पुनरवसानेऽन्योऽन्यं विगणय्य मानमपि युञ्ज्वः ।
बत पात्रि न हि विमोक्तुं शक्ये त्वत्प्रेमबन्धनान्नूनम् ।
देवो जानाति यथाहमपश्यंस्ते मुखं प्रदोधूये ।
मम जीवितप्रयोजनमेव त्वं त्वां विना न काप्यस्ति ।
हन्तास्मदीयहृदये भूयोभूयो महेश्वरः साक्षी ।
उड्डयितुं किं शक्येऽहमन्यदीपं सकृत्प्रिये हन्त ।
कथमितरत्र विनूत्नप्रियसम्पर्कं समारभे कर्तुम् ।

९३

क्षणमपि मदीयदुःखाश्रूण्यङ्गीकुर्वते न मां हन्त ।
उन्मीलयितुं मामकपक्ष्माण्यन्यार्थदर्शनायाद्य ।
उपविश्य तुल्यपाने यदि बोभूयात जीवमित्राणि ।
स्मर्तव्योऽहमवश्यं प्रायःप्राणसख एष युष्माभिः ।
पापिष्यथ यदि मद्यं प्रियमपि पथ्यं परस्परं यूयम् ।
मह्यं सम्बोभूयान्मधुक्रमश्चेदधःकुरुत पात्रम् ।
यदि सांवत्सरिकोत्सवमङ्गीकृत्य स्वयं प्रकुर्यात ।
बोभूयातान्योऽन्यानुकूलसन्तोषकारिणः सर्वे ।

In Public domain. Digitization Muthulakshmi Research Academy

९४

मधुरमधुपूर्णचषकं पाणौकृत्यापि यन्नटेत्यात्री ।
दीनं मामेतादृशमाशीर्वचसा सहैव संस्मरत ।

॥ सम्पूर्णम् ॥

- ब्रह्मश्रीमदज्ञाडादिभट्ट नारायणदासः
श्री विजयरामगानपाठशालोपाध्यायाध्यक्षः
श्री विजयनगरम् ।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2023

978-93-80171-84-5